॥श्रीगणेशायनमः॥श्रीवाग्देवतायैनमः॥ ॥लक्ष्मीपादयुगंप्रणम्यपितरंश्रीबालकृष्णाभिधंभारद्वाजकुलो
बुधौविधुमिवश्रीगौरवा स्यंबुजात्॥ज्ञात्वाशेषमतंमितेनवचसासिद्धांतमुक्तावलीगूढार्थंस्तनुतें
यथामतिमहादेवःपरेषांकृते॥१॥भाषापरिच्छेदव्याख्यानेचिकीर्षुःश्रीविश्वनाथपंचाननोनिर्वि
घ्नपरिसमाप्तयेकृतस्येश्वरनिर्देशरूपमंगलस्यशिष्याअव्ययंकुर्युरितिशिष्यशिक्षायैनि बंध
नंकुर्वन्नीश्वरंप्रार्थयते॥चूडामणीकृतेति॥लीलेति॥इदंचविशेष्यं॥नातःसमाप्तपुनरारब्धत्वंदो
षः॥चस्मृतस्मृ॥विधोःकिमितिचूडामणीकरणंकिमर्थंवासकेवलयीकर णंइत्याकांक्षायांनि
राकांक्षाप्रतिपत्तिर्नभवतीतिलीलेत्यादिविशेषणानुक्तौविवक्षितान्वयबोधाभावान्नायमत्रदोषः
उक्ताव्याकांक्षयाविशेषणान्वयएवतत्प्रसरादिति॥लीलेति॥लीलयातांडवंनृत्यंतत्रपंडितःअभि
ज्ञइत्यर्थः॥अनेनचनृत्यविशिष्टतयास्मृतिविषयत्वात्प्रार्थिताअर्थाभवंत्येवेतिसूचितं॥ननुभूषण
रहितेकथंनृत्यंतत्राह॥चूडामणीकृतेति॥शिष्यावधानायप्रतिजानीतेनिजनिर्मितेति॥निजेनस्वे
ननिर्मितारचितायाकारिकावलीतांअतिअत्यंतंसंक्षेपःशब्दसंक्षेपोयासकृताअतिसंक्षिप्तास्ताद्

स्थश्चताश्चिरंतनानांकणादप्रभृतीनांउक्तयोवचांसिवचःप्रतिपाद्यायुक्तयस्ताभिःकृत्वाहंवि
दंकरवाणि॥प्रकटीकरोमीत्यर्थः॥ननुलीलावत्यादिप्राचीननिबंधाध्ययनेनैवकारि
कावलीप्रतिपादितोऽर्थोबोद्धव्यइतिकिमनेनभवत्कृविदेयंनिबंधनेत्यतउक्तमति
संक्षिप्तेति॥तथाचलीलावत्यादिप्राचीननिबंधनेषुग्रंथबाहुल्येनबहुतरदुःखहेतुप्रति
पत्तिकतयानबालानांप्रवृत्तिरितिभावः॥स्वोत्प्रेक्षामूलकतांप्रयुक्तानादरणीयतांनि
रसयितुंचिरंतनेत्युक्तं॥नन्वित्यवधारणे॥नथाचकुतुकोदवेत्यर्थः॥एतेनस्वस्यग्रंथकर
णेऽल्पेशभावःसूचितः॥ स्वस्यग्रंथकरणेप्रवृत्तौनिमित्तमाह॥राजीवेति॥राजी
वेयादयाकृपातयाचशंवदस्तदधीनइत्यर्थः॥ननुग्रंथादौश्रोतृप्रवृत्तयेप्रयोजनादिव
क्तव्यंभवतिनस्यचेहानुक्तत्वा दुपेक्षणीयमेतद्ग्रंथस्यस्यादित्याशंक्यविषयप्रयोजनसं

वंधाधिकारिणः सूचयन्नतिसंक्षिप्तत्वादेतद्ग्रंथस्यसकलपदार्थप्रतिपादकतयाकथंबालस्यबु त्पत्ति
रितीमांशंकामेत द्ग्रंथस्यसकलपदार्थप्रतिपादकत्वप्रदर्शनेनपरिहरन्यत्करोषियद्स्मासिद्ध
ज्जुहोषिद्दासियत्त॥यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमितिभगवदुक्तेर्मुक्तावलीसमंस्व
कीयग्रंथंश्रीभगवतिचार्पयन्स्वकीर्त्यनुरक्तयेग्रंथस्यस्वस्यचनामनीनिबध्नाति॥सद्द्रव्ये
ति॥द्रव्यैःसहितायुक्तायप्रतिपादकतयागुणैरपिगुंफितायुक्ता॥सतामुत्क्षेपणादीनांपंचा
नांकर्मणांज्ञापिकाबोधिकासज्जातिरूपंसामान्यंविशेषाःनित्यःसमवायस्तैर्भि लिता
॥यद्वा॥संतिसामान्यविशेषनित्यमिलितानियस्यांनित्यमिलितंनित्यःसंबंधः॥अभावप्रकर्ष
आगभावादिभेदेनवैलक्षिण्यं॥तस्यउज्ज्वलाप्रकाशिका॥एषाबुद्धिस्थासिद्धांतमुक्तावली
सिद्धांतएवमुक्तास्तासांआवलीपंक्तिर्विष्णोर्नारायणस्यवक्षसि वक्षस्थलेविन्यस्तावि

BHAU DAJI

शेषतोअर्पिता॥सुकृतिनांपंडितानांमनसःमुदंसंतोषंचिरंबहुकालंवितनुतेविस्तारयत्वित्य
र्थः॥ननुयुक्तीनामत्रासत्वात्कथंविदुषांसंतोषस्तत्राह॥सयुक्तिरिति॥सत्योयुक्तयोयस्यांसातथे
त्यर्थः॥मुक्तावलीसाहश्यंचद्रव्यादिपदार्थवत्तया॥तथाहि॥मुक्तावलीसाध्यतयाद्रव्यव
तीं॥द्रव्यसाध्येतियावत्॥नानाविधद्रव्यचरितावा॥गुणेनसूत्रेणगुंफितानिमिता॥सु
कृतिनांपुण्यवतांयानिसमीचीनानिभगवद्भजनादिरूपाणिकर्मा णितेषांबोधिका
॥सत्सामान्यंसमीचीनाजातिः॥विशेषोमहत्त्वनिर्मलत्वादिस्ताभ्यांनित्यमनवरतंमि
लितासंबद्धा॥अभावेतेजोभावेंधकारेसतिप्रकर्षोज्वलार्थप्रकाशिकेतिमुक्तावलीय
याद्रव्यादिसकलपदार्थवतीतथायंग्रंथोपीति॥अत्रमुक्तावलीत्वोक्त्यानिर्दोषत्वंसूचि
तं॥अत्रद्रव्यादिसकलपदार्थप्रतिपादकत्वप्रदर्शनेनद्रव्यादयोविषयाउक्ताः॥पदार्थ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तत्रावधारणंचप्रयोजनंसूचितं॥संबधश्चप्रतिपाद्यप्रतिपादकभावः॥पदार्थतत्रावधारणकामोऽधिकारी॥ग्रंथारंभसमयेकृतस्यमंगलस्यतन्निबंधनस्यचवैय्यर्थ्यमाशंक्यफलंदर्शयति॥विघ्नविघातायेति॥प्रारब्धुमिष्टस्यग्रंथस्येतिशेषः॥यद्यप्यत्रघातपदस्योत्पत्तिमद्भावपरतयाविपदमनर्थकमितिप्रतिभाति॥तथापिविशिष्टवाचकानांपदानांसतिएवविशेषणवाचकपदसमवधानेविशेष्यमात्रपरतायाःसकीचकैर्मारुतपूर्णरंध्रैरित्यत्रकीचकावेणवस्तेस्युर्येचनेत्यनिलोद्भूताइतिकोशान्मारुतपूर्णरंध्रत्वविशिष्टवेणुबोधककीचकपदंदृष्ट्वाद्भूतपदमभावमात्रपरंद्रष्टव्यं॥ननुनिष्फलत्वान्मंगलाचरणमयुक्तं॥नचनिष्फलत्वमेवासिद्धं॥तस्यफलविशेषशून्यत्वरूपहेतोरसाधनादित्यभिप्रायेणशंकतेनचेति॥मंगलस्यकारणलाभावेव्यतिरेकव्यभिचाररूपहेतुमाहं॥विनापीति॥निर्विघ्नपरिसमाप्तिरिति॥विघ्नध्वंसपूर्वकसमाप्तिरित्यर्थः॥नचतत्रजन्मांतरीयमंगलकल्पनान्व्यभिचारइतिवाच्यं॥भोगादिनापिनास्तिकात्मनिविघ्ननाशसंभवेनजन्मांतरीयमंगलसंदेहेनव्यभिचारसंशयसंभवात्॥अत्रकादंबर्यादिग्रंथेमंगलसत्वेपिसमाप्तेरदर्शनादन्वयव्यभिचारोपिदोषोबोध्यः॥व्यभिचारसंशयस्यग्रात्यसंशयरूपतयाकारतात्पर्यक्षेएवप्रतिबंधकत्वं॥नत्वनुमितौ॥तत्रतस्यानुकूलत्वादित्यभिप्रायवान्॥मंगलंसमाप्तिफलकंसमाप्त्यन्याफलकत्वेसतिसफलत्वादितिपरिशेषानुमानेनमंगलस्यसमाप्तिफलकतांव्यवस्थापयिष्यन्प्रथमतोविघ्नध्वंसिद्धिनिरासायफलवलंसाधयति॥अविघ्नेतेति॥विषयत्वंचज्ञानविषयस्करत्वेतिप्रसक्तमतआह॥आचारेति॥आचारस्यऽत्रयद्यपिक्रियैवतथापिविषयत्वश्रुतेःकृतिरेवविवक्षिता॥तद्विषयत्वंचविधेयतयाबोध्यं॥तेनफलेनव्यभिचारः॥तस्योद्देश्यतयाचकृतिविषयत्वात्॥विधेयतयाकृतिविषयत्वंचैत्यवंदनादावपीत्यतःशिष्टेति॥शिष्टत्वंचफलेसाधनतांशून्यांतिरहितत्वं॥ननुवे

दप्रामाण्यायुपगंतव्यंतेनयुक्तमेणकृतेदर्शादौनिष्फलेनव्यभिचारः॥शिष्टाचारविषयत्वंश्ये च
नयागादावप्यस्त्यतोऽविगीतेति॥अविगीतत्वंचबलवदनिष्टाननुबंधित्वं॥तेनश्येनयागा
दौप्रवृत्त्युपयुक्तबलवदनिष्टाननुबंधीष्टसाधनत्वरूपसाध्याभावेपिनव्यभिचारः॥सि
द्धे॥अनुमिते॥तत्रमंगले॥फलजिज्ञासायांविशेषतःफलजिज्ञासायां॥ननुकथंतर्हिगं
गोरुनानादीनामदृष्टार्थकृतेत्यतःसंभवतीति॥तथाचतत्रदृष्टसंभवेनादृष्टकल्पनेतिभा
वः॥ननुतथापिविश्वजिन्यायात्स्वर्गएवैंककल्प्यतामतआह॥उपस्थितत्वादिति॥प्रारब्धं
कर्मह्यविघ्नेनपरिसमाप्यतामितिग्रंथादौप्रवृत्तपुरुषकामनाविषयत्वेनपरिशेषानुमानेन
प्रवर्त्तमानपुरुषस्योपस्थितत्वादित्यर्थः॥कल्प्यते॥अनुमीयते॥अनेनचमंगलस्यसमाप्तिहे
तुत्वेऽनुमानमेवप्रमाणंनतुश्रिष्टाचारानुमिताश्रुतिः॥इदानीमानुपूर्व्याविशेषनिर्णयाभावेन

॥ ॥ ॥

मात्तिरितिभावः॥आहुरित्यत्रसोऽनंतरीजंतुविघ्नध्वंसद्वारामंगलस्यसमाप्तिहेतुत्वेनसंभवति
नास्तिकग्रंथसमाप्तौव्यभिचारात्॥नचस्वजनकविघ्नध्वंसीयत्यवच्छेदकतासंबंधेनसमाप्ति
प्रतिस्वजन्यविघ्नध्वंसावच्छेदकतासंबंधेनमंगलस्यहेतुत्वात्॥स्वप्रतियोगिचरमवर्णानुकू
लकृतिमत्वसंबंधेनसमाप्तिप्रतिआश्रयतासंबंधेनमंगलस्यहेतुत्वात्॥जन्मांतरीयमंगलके
त्यनयानव्यभिचारइतिवाच्यं॥तथासतिजन्मांतरीयसमाप्तिमुद्दिश्यजन्मांतरेमंगलकरणा
पत्तेः॥अतःस्वप्रतियोगिचरमवर्णावच्छेदकतासंबंधेनसमाप्तिप्रतियोग्यत्यवच्छेदकजाती
यतासंबंधेनमंगलहेतुत्वस्यवाच्यतयानास्तिकशरीरेव्यभिचारस्यदुर्वारत्वात्॥नचपुत्रकाम
नाधिकरणविरोधः॥सहकार्यंतरसमवधानेहिकपुत्राभावेप्यमुष्मिकपुत्रसूपफलस्यतत्र
सिद्धांतितत्वादितिवाच्यं॥तत्रपुत्रकामनाश्रवणात्॥इहतुविशिष्टविशिष्टचारानुमितश्रुत्यादि

किकसमाप्तेरेवमंगलफलत्वात्॥नचस्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वावच्छिन्नोत्तरोक्षणोत्पत्ति
कत्वोभयसंबंधेनमंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्यमंगलकार्यतावच्छेदकत्वान्नव्यभिचा
रइतिवाच्यं॥कारणस्यकार्यतावच्छेदकत्वानभ्युपगमात्॥अतएवकाशीमरणान्मुक्तिरितिश्रु
त्यंतर्गतपंचम्याःप्रयोजकत्वोपवर्णनंग्रंथकृतांसंगच्छते॥अन्यथातत्रापिकाशीमरणवि
शिष्टमुक्तिंप्रतिकाशीमरणहेतुत्वस्यनिर्दुष्टतयातथोपवर्णनमसंगतमेवस्यात्॥अथतमेव
विदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेऽयनायेतिश्रुत्यातत्त्वज्ञानस्यैवमुक्तिसामान्यंप्रति
हेतुत्वंकाश्यांप्रतिपादितं॥तच्चकाशीमरणस्यमुक्तिहेतुत्वेनसंभवति॥काशीमरणजन्यमुक्तौत
त्त्वज्ञानव्यभिचारादतःकाशीमरणस्यमुक्तिजनकत्वं॥अपितुतत्त्वज्ञानद्वारामुक्तिप्रयोजकत्व
मितिग्रंथकृतांतत्रपंचम्याःप्रयोजकत्वोपवर्णनं॥नतुकारणस्यकार्यतावच्छेदकत्वात्तथोपवर्णन

मितिचेदस्तु कारणस्यकार्यतावच्छेदकत्वंपूर्वोक्तरीत्यामंगलजन्यविघ्नध्वंसविशिष्टसमाप्तिलस्य
कार्यतावच्छेदकत्वेनास्तिकशरीरेयभिचारवारणं॥एवमपिभोगादिनाप्यविघ्नध्वंसपूर्वकस
माप्तौकृतनियतपूर्ववृत्तितांकेनध्वंसेनेवमंगलस्यैवसमाप्त्युपपत्तेर्मंगल[illegible]स्या
न्यथासिद्धत्वंदुर्वारमेव॥नचव्यापारेणव्यापारिणोनान्यथासिद्धिरितिवाच्यं॥यत्रव्यापा
रिणःप्रमाणबोधितकारणतानिर्वाहायव्यापारस्यकारस्यकारणत्वंकल्प्यते॥यथा
यागस्यस्वर्गहेतुतानिर्वाहायापूर्वंतत्रैवव्यापारेणव्यापारिणोनान्यथासिद्धिः॥अतएवका
म्यमरणस्यतत्त्वज्ञानेनमुक्तौऽन्यथासिद्धत्वात्प्रयोजकतयाश्रुतिसमर्थनंसंगच्छतेति॥प्रकृते
चप्रतिबंधकाभावस्यकार्यमात्रेहेतुतायाःमंगलकारणतांविनापिकृततयामंगलस्या
न्यथासिद्धत्वंदुष्परिहरमेवेति॥विघ्नध्वंसस्यद्वारत्वमिच्छतांप्राचांमतेपिविघ्नध्वंसस्य

कार्यत्वावश्यकतयाऽत्रविघ्नोमाभूदितिकामनयाचमंगलाचरणेनविघ्नध्वंसएवफल
मितिवदतांचिंतामणिकृतांमतमाह॥नव्यास्त्विति॥विघ्नध्वंसएवेत्येवकारेणसमाप्तिव्यवच्छेदः
॥फलेप्रवृत्युद्देश्यं॥ननुसमाप्तिस्तूर्यकस्मिकीस्यादितआह॥समाप्तिस्त्विति॥बुद्धिर्ज्ञानं॥प्र
तिभातद्विशेषः॥स्फूर्त्यारभ्यः॥प्रतिभादीत्यादिनाविघ्नसंसर्गभावपरिग्रहः॥अनयेव
रीत्याकारीरीस्थलेप्यवग्रहनिवृत्तिरेवफलं॥वस्तुस्तुस्वकारणादेवेतिध्येयं॥ए
वंमंगलस्यविघ्नध्वंसंप्रतिजनकत्वे॥स्वतःसिद्धविघ्नवैरॅवेतेति॥विघ्नात्यंताभाव ह
वता॥ननुनिष्फलेप्रवृत्तिरेवकथंअतआह॥विघ्नशंकयेति॥संशयनिश्चयसा
धारणविघ्नज्ञानमेवप्रवर्त्तकमितिभावः॥तदाचरणात्॥मंगलाचरणात्॥ननुविघ्न
संशयेमंगलाचरणमेवासिद्धमित्यतआह॥तथैवेति॥शिष्टाचारादिति॥विषयता

संबंधेन मंगलइतिशेषः॥ननुनिर्विघ्नपुरुषानुष्ठितमंगलस्थलेऽन्वयव्यभिचारेणविघ्नध्वंसंप्रति
मंगलस्यकारणताबाधिता॥तथाचबाधितार्थबोधकत्वाद्वेदस्याप्रामाण्यमितिश्रुतेः
कारणताबोधकत्वमंगीकर्तृमतेआशंकांनिरस्यति॥नचेति॥तस्यनिर्विघ्नपुरुषानुष्ठितमं
गलस्य॥तद्बोधकेति॥मंगलविघ्नध्वंसयोःकार्यकारणभावबोधकेत्यर्थः॥सतिविघ्नइ
ति॥तथाचोपदर्शितस्थलेप्रतियोगिरूपकारणाभावेनविघ्नध्वंसरूपकार्यानुत्पत्तौका
रणतायाःअबाधितत्वेननकारणताबोधकवेदाप्रामाण्यमितिभावः॥अतएवनाशंप्रतिप्रति
योगिनःकारणत्वादेव॥ननद्बोधकवेदाप्रामाण्यमिति॥प्रायश्चित्तस्यपापनाशकत्वबोध
कवेदाप्रामाण्यमित्यर्थः॥ननुमंगलेनविघ्नध्वंसेकारणंविनायकस्तवपाठादिजन्यविघ्नध्वंसे
व्यभिचारात्॥विनायकस्तवपाठस्यमंगलत्वेपितदनुकूलकंठाभिघातरूपस्यतत्पाठस्य

मंगलत्वाभावात्॥नचपाठकनासंबंधेनविनायकस्तवएवविघ्ननाशकः॥सचमंगलमेवेतिन्यभि
चारइतिवाच्यं॥सर्वेविघ्नाःक्षमंयांतीत्यादिनातत्पाठस्यापिविघ्ननाशकत्वबोधात्॥प्रायश्चित्तज
न्यविघ्नध्वंसेव्यभिचाराच्चेत्यतआह॥मंगलंचेति॥विनायकस्तवपाठादिरित्यादिनाप्रायश्चित्ता
दिसंग्रहः॥तथाचमंगलस्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेनमंगलविशिष्टविघ्नध्वं
सत्वंविजातीयविघ्नध्वंसत्वंवाकार्यतावच्छेदकं ॥एवंविनायकस्तवपाठस्योपदर्शितसं
बंधेनविनायकस्तवपाठविशिष्टविघ्नध्वंसत्वंविजातीयविघ्नध्वंसत्वंवाकार्यतावच्छेदक
मितिनव्यभिचार इतिभावः॥ननुविघ्नध्वंसएवमंगलस्यदिफलंतदासमाप्तिकामस्य
मंगलेप्रवृत्तिर्नस्यात्॥अतःसमाप्तिसाधनविघ्नध्वंससाधनत्वान्मंगलेप्रवृत्तिर्वाच्या॥
नचनसंभवति॥स्वतःसिद्धविघ्नविरहस्थलेव्यभिचारेणविघ्नध्वंसस्यसमाप्तिसाधनत्वा

भावादित्याशंकांनिरस्यति॥क्वचिदिति॥प्रतिबंधकेति॥संसर्गाभावस्यसंसर्गाभावत्वेनसंसर्गाभाव
स्य॥तथाचविघ्नसंसर्गाभावत्वेनहेतुत्वान्नपूर्वोक्तव्यभिचारइतिभावः॥अत्रचतत्तद्विघ्नाभावत्वे
नहेतुतानतुविघ्नाभावकूटत्वेनविघ्नप्रागभावादीनामेकत्रासंभवेनसमाप्तिर्नस्यादितिबोध्यं
॥यत्रमंगलंविनापिसमाप्तिस्तत्रविघ्नध्वंसाभाववतिसमाप्तेर्दर्शनाद्व्यतिरेकव्यभिचारमा
शंक्यनिषेधति॥इत्थंचेति॥दुरितध्वंसकल्पनेतज्ज्ञानकीभूतकल्पनेचगौरवादतआह॥स्वतः
सिद्धेति॥यत्रचमंगलेसत्यपिनसमाप्तिस्तत्रमंगलाद्विघ्नध्वंसोभवत्येवसमाप्त्यभावस्तुवि
घ्नभूयस्त्वात्तत्तन्मंगलानंतरोत्पन्नविघ्नाद्वेत्यवधेयं॥अथसमाप्तिविघ्नध्वंसयोराकाश्ग
तनिष्ठयोःकथंकार्यकारणभावइतिचेदुच्यते॥स्वप्रतियोगिप्रयोजकतसंबंधेनचरमवर्ण

DR. BHAU DAJI

ध्वंसरूपसमाप्तिंप्रतिविशेषणतासंबंधेनविघ्नसंसर्गाभावत्वेनहेतुत्वमिति॥वस्तुतस्तु॥आ
दुरित्यनेनसूचितामन्यथासिद्धिंप्रकटयति॥क्वचिच्चेति॥विघ्नात्यंताभावेनेत्येवकारेणवि
घ्नध्वंसस्यतद्वारकमंगलस्यचव्यवच्छेदः॥समाप्तिसाधनं॥समाप्त्यव्यवहितपूर्ववृत्तितया
निश्चितः॥तथाचतेनैवमंगलस्वलीयसमाप्तिनिर्वाहेमंगलस्यतज्जन्यविघ्नध्वंसस्यान्यथा
सिद्धिः॥ध्वंसप्रागभावयोरत्यंताभावेनविरोधेमानाभावात्॥ध्वंसस्वलेप्यत्यंताभावसत्वादि
तिभावः॥नन्वन्योन्याभावभिन्नाभावत्वेनैवलाघवाद्धेतुरस्त्वित्यतआह॥प्रतिबंधकसंस
र्गेति॥प्रतिबंधकसत्वेपिसंबंधांतरावच्छिन्नाभाव"स्यसत्वात्कार्योत्पत्तिवारणायतत्तत्संसर्गावच्छि
न्नप्रतियोगिताकाभावत्वेनैवहेतुत्वस्यवाच्यत्वेनध्वंसस्यनहेतुतातस्यसंसर्गावच्छिन्नत्वेमानाभा

९ ७

भावादितिभावः॥दुरितध्वंसः॥दुरितध्वंससामग्रीप्रयुक्तः॥स्वतःसिद्धदुरितकारणाभावप्रयुक्तो॥वा
॥एतेनविघ्नध्वंसस्यतदर्थताभावस्यवासमाप्तिहेतुताविचारस्याप्रकृततयातद्व्यवस्थापनेप्र
कृतानुपयोगः॥एवंप्रतिबंधकाभावकूटस्यहेतुत्वेप्रागभावध्वंसयोर्युगपदवस्थानासंभवे
नैकदीकृयप्रसिद्धिः॥पूर्वोक्तरीत्यातत्तत्संसर्गावच्छिन्नप्रतियोगिताकत्वस्यप्रतिबंधकाभा
वविशेषणत्वेनैवध्वंसप्रागभावयोरसंग्रहश्चेतिदूषणानिनिरस्तानि॥उक्तरीत्याप्रतिबं
धकात्यंताभावस्यैवकार्यमात्रेहेतुत्वादिति॥अत्रकेचित्॥निर्विघ्नपरिसमाप्यतामितिका
मनयेहविघ्नोमाभूदितिकामनयामंगलमाचरंतीतिनिर्विवादं॥तत्राद्याकामनाफलविष
यिणीद्वितीयातूपायविषयिणी॥नचद्वितीयैवकामनाफलविषयिणी॥आद्यापिकामना

वसंयोगेनगगनाभावाभावादीनांकेवलान्वयित्वमुपपद्यतइत्याहुः॥तन्नपूर्वोक्तान्यथासिद्धेईश्व
रुतयामंगलेसमाप्तिहेतुत्वस्यबाधात्॥मूलेनूतनेत्यादि॥नूतनोयोजलधरोमेघस्तस्यरुचिरि
वरुचिर्दीप्तिर्यस्यतस्मै॥एतेननूतनजलधरःशीघ्रंवृष्टिप्रदःतथायमपिस्वाभिलषितफलप्र
दातेतिसूचितं॥नमस्कार्यस्यभगवतःसंतुष्टांसूचयितुंविशेषणमाह॥मूलेगोपेति॥गोपानांव
धूट्योमुग्धस्त्रियोतासांदुकूलावस्त्रंतस्यचोरायेत्यर्थः॥तस्माइत्तिच्छब्दःसामान्यतःसकल
जनप्रसिद्धत्वसूचनाय॥श्रीकृष्णायनमइत्यनेननमस्कारप्रकारीभूतापकर्षविधित्वमु
क्तंतदयुक्तंमानाभावात्॥भगवतीत्याशंक्यनैय्यायिकाभिमतेश्वरसाधकानुमानसूच
नायतत्रसंसारस्यमहीरुहइतिषष्ठीतत्पुरुषभ्रमंवारयितुंकर्मधारयमाह॥मुक्तावल्यांसं

सारएवेति॥बीजत्वंसमवायिकारणत्वं॥तच्चेश्वरेबाधितमतआह॥निमित्तेति॥ननुईश्वर
नमस्काररूपंमंगलाचरणमयुक्तं॥ईश्वरेमानाभावात्॥नहितत्रप्रत्यक्षंप्रमाणं॥अनु
पिद्रव्यत्वेनबाह्यप्रत्यक्षाविषयत्वात्॥नापिमानसं॥परात्मनःपरेणमनसाप्रत्यक्ष
वारणायात्मप्रत्यक्षंप्रतिपरात्मव्यावृत्तविजातीयमनःसंयोगत्वेनहेतुत्वस्यावश्यंवा
च्यतयाईश्वरेतस्याभावात्॥नचयावाभूमीजनयन्देवएकइत्यादिश्रुतिरेवप्रमाणंश्रु
तीनामीश्वरोच्चरितत्वेनैवप्रामाण्यादीश्वरसंदेहेश्रुतिप्रामाण्यस्यापिसंदिग्धत्वादतआ
ह॥एतेनेति॥प्रमाणंअनुमानरूपंप्रमाणं॥तथाक्षित्यंकुरादिकमपीति॥ननुत्रकिंपक्षता

वच्छेदकं॥नतावक्षितित्वं॥अंकुरादेरपिक्षितित्वेनएवपादानत्वेवैय्यर्थ्यात्॥किंचक्षितित्वसामानाधिकरण्येनसाध्यसिद्धेरुद्देश्यत्वेदृष्टांतेघटादावंशतःसिद्धसाधनमवच्छेदकावच्छेदेनतथात्वेपरमाणौबाधः॥जन्यक्षितित्वस्यपक्षतावच्छेदकत्वेपरमतेजन्यपदव्यावृत्त्यप्रसिद्धिः॥तन्मतेऽजन्यक्षितेरभावात्॥जन्यत्वस्यैवतथात्वसंभवेनपक्षतावच्छेदककोटौक्षितित्वस्यव्यर्थत्वाच्च॥नचतदपिसंभवतिपक्षतावच्छेदकहेत्वोरैक्यान्नसिद्धसाधनमितिचेन्न॥स्वरूपसंबंधविशेषरूपकार्यत्वस्यैवपक्षतावच्छेदकत्वात्॥प्रागभावप्रतियोगित्वस्यैवकार्यत्वस्यहेतुत्वेननयोरैक्याभावादिति॥साध्यंचनस्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिजन्यत्वं॥कार्यमात्रंप्रतिकरेवान्वयव्यतिरेकाभ्यांहेतुत्वेनतज्ज्ञानकृतिज्ञानचिकीर्षयोस्तु

त्रान्यथासिद्धत्वेनतत्रितयजन्यत्वरूपसाध्यस्यतत्रबाधात्॥दृष्टांतपक्षसाधारणेकत्वस्वत्वस्याभावेनतद्घटितस्वोपादानगोचरेत्यादिसाध्यस्यासंभवात्॥कृतित्वापेक्षयोपादानगोचरकृतित्वस्यगौरवेणकार्यजनकतानवच्छेदकत्वाच्च॥किंतुविशेष्यतासंबंधावच्छिन्नकृतित्वावच्छिन्नकृतिनिष्ठकारणतानिरूपितसमवायसंबंधावच्छिन्नकार्यत्वं॥तेनादृष्टद्वारास्मदीयकृतिजन्यत्वस्यपक्षेसत्वेपिनसिद्धसाधनं॥यद्वाकार्यमात्रेकृतित्वेनान्वयव्यतिरेकाभ्यांज्ञानत्वेनेच्छात्वेहेतुत्वंस्वीक्रियते॥तदाताद्दशज्ञानजन्यत्वंमिछाजन्यत्वंकृतिजन्यत्वंसाध्यमस्तु॥ननु॥कर्तृजन्यत्वमेवसाध्यमस्तु॥तन्न॥कार्यमात्रेकर्तृत्वेनजनकत्वेमानाभावात्॥लाघवाच्चकृतित्वेनैवतद्धेतुत्वात्॥ननुकार्यविशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यताशालि॥प्रागभावप्रतियोगित्वादित्यनुमानंफलितं॥तत्रध्वंसेपक्षतावच्छेदकजन्य

न

त्वाक्रांतेविशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसा
ध्यस्याभावाद्बाधइतिचेन्न॥सत्वविशिष्टजन्यत्वस्यैवध्वंसव्यावृत्तस्यपक्षतावच्छेदकत्वोपगमा
त्॥नचहेत्वधिकरणेध्वंसेउक्तसाध्याभावेनव्यभिचारइतिवाच्यं॥सत्ववैशिष्ट्यस्यहेतौविशेष्य
णात्॥अथैवंरीत्याव्यभिचारवारणेपिध्वंसस्यकृतिजन्यत्वमानाभावेनकार्यमात्रस्यकृति
जन्यत्वप्रवादोव्याहन्येतिचेन्न॥तादृशप्रवादस्यनिर्युक्तिकत्वेनाश्रद्धेयत्वात्॥यद्वा॥जन्यत्व
मात्रंध्वंससाधारणमेवपक्षतावच्छेदकं॥कृतिजन्यत्वमात्रंसाध्यं॥एवंहेतावपिसत्वंवैशिष्ट्यं
नापादेयप्रयोजनाभावात्॥एवंचध्वंसेपीश्वरीयकृतिजन्यत्वस्यनिराबाधतयाकार्यमात्रंकृ
तिजन्यत्वप्रवादोप्युपपद्यते॥नचकृतिजन्यत्वमात्रस्यसाध्यत्वेदृष्टाद्यादृविरादिगोचरास्म

दीयकृतिजन्यत्वमादायसिद्धुसाधनमितिवाच्यं॥अदृष्टाद्यैकत्वेनकृतिजन्यतायाःविशेषणीयत्वादितिदि
क्॥एतादृशानुमितौलाघवज्ञानसहकारेणज्ञानेच्छाकृतिषुनित्यत्वमेकत्वंचभासतइतिनित्ये
कतासिद्धिः॥अथेश्वरज्ञानादौकीदृशमेकत्वमनुमित्याविषयीक्रियते॥नतावत्संख्यारूपो॥
गुणेगुणानंगीकारात्॥नचनित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपमेकत्वंतद्विष
यइतिवाच्यं॥ईदृशैकत्वस्यनित्यज्ञानानुमितेःप्रागनुपस्थितत्वेनतादृशानुमितौभानासंभ
वादितिचेदत्रकेचित्॥सामानाधिकरण्यसंबंधेनैवज्ञानादावाश्रयगतमेकत्वमनुमितौ
भासते॥यद्वा॥द्वित्वसमानाधिकरणरूपमेकत्वंतद्विषयः॥नचजीवेश्वरगतद्वि
त्वसमानाधिकरणत्वस्येश्वरज्ञानादौसत्वाद्बाधइतिवाच्यं॥दुःखवदवृत्तित्वेनद्वित्वस्यवि

शेषणीयत्वात्॥नचैवमपिपटेश्वरगतद्वित्वसामानाधिकरण्यस्यतत्रसत्वाद्बाधइतिवाच्यं॥आ
त्मानात्मवृत्तिभिन्नत्वेनापिद्वित्वस्यविशेषणीयत्वादित्याहुस्तन्न॥ईश्वरेज्ञानद्वयंगीकारेपिए
तादृशैकत्वभाननिर्वाहेणाद्वैयासिद्धेः॥वस्तुतस्तु॥स्वाधिकरणावृत्तिस्वभिन्नज्ञानकत्वमे
वैकत्वं॥एवमीश्वरेछाकृतीरपिद्रष्टव्यं॥एवंचतादृशज्ञानादिसिद्धौतत्रगुणत्वेनहेतुनाद्व्या
श्रितत्वेसाधनीयेद्रव्यांतरस्यबाधात्ईश्वरइसिद्धिरितिद्रष्टव्यं॥अप्रयोजकत्वादिति॥अनु
कूलतर्कभावादितिभावः॥इहमुपलक्षणं॥शरीराजन्यत्वहेतोश्शरीररूपविशेषणस्यासि
द्धिवारकत्वेपिव्यभिचारावारकत्वेनव्यर्थतयातद्विशेषणावच्छेदेनव्याप्तिग्रहासंभवेनव्या
प्यत्वासिद्धिश्चेत्यपिद्रष्टव्यं॥नचव्यर्थविशेषणस्याधिक्योक्त्याप्रयोजकत्वेपितज्ज्ञान

स्यव्याप्तिज्ञानप्रतिबंधकत्वेमानाभावइतिवाच्यं॥तथापिगुरुधर्मस्यानवच्छेदकतयासा
ध्यसंबंधितावच्छेदकरूपव्याप्तेस्तत्राभावेनव्याप्यत्वासिद्धेर्दुर्वारत्वादिति॥तदुक्तमाचार्यैः
॥एकामसिद्धिंपरिहरतोद्वितीयापत्तेरिति॥कर्तृत्वेनकार्यत्वेनकार्यकारणभावएवेति॥न
चान्वयव्यतिरेकाभ्यांघटत्वावच्छिन्नंप्रतिकुलालादिकृतित्वादिनैवहेतुत्वादेतादृशकार्यका
रणभावेमानाभावइतिवाच्यं॥घटत्वपटत्वादिभेदेनानंतकार्यकारणभावापेक्षयाकार्य
त्वावच्छिन्नंप्रतिकृतित्वेनहेतुत्वकल्पनस्यौचितत्वात्॥यद्विशेषयोरितिन्यायेनकार्यत्वकृति
त्वाभ्यांसामान्यकार्यकारणभावस्यावश्यकत्वाच्च॥नचतादृशन्योयोनिष्प्रमाणिकइतिवाच्यं॥
कार्यत्वावच्छिन्नाभावेनतत्कृत्यभावकूटस्यप्रयोजकत्वकल्पनागौरवात्॥कृतित्वावच्छिन्नाभा
वस्यैकस्यप्रयोजकत्वेलाघवादिति॥केचित्तु॥मास्तुकार्यत्वंकृतेःकार्यतावच्छेदकंतथापिघट

त्वावच्छिन्नंप्रतिकर्तेःकारणतयासर्गीयकालीनघटादिकंपक्षीकृत्यघटत्वादिहेतुनासकर्तृकत्वसा
धनेजीवानांबाधादीश्वरसिद्धिरित्याहुः॥दीधितिकृतस्तुकार्यत्वावच्छिन्नंप्रतिकर्तेहेतुत्वाभा
वेपिघटत्वाद्यवच्छिन्नंप्रतिकर्तेहेतुतयाखंडघटोत्पत्तेःपूर्वंकर्तुरावश्यकतयातदाश्रयत्वेने
श्वरसिद्धिरित्याहुः॥नन्वेवंरीत्याघटादिकुलादिचेष्टयोरन्वयव्यतिरेकाभ्यांकार्यत्वाद्यवच्छि
न्नंप्रतिचेष्टत्वादिनाहेतुत्वादंकुराद्युत्पत्तेःपूर्वंचेष्टानुरोधेनेश्वरस्यनित्यशरीरमपिसिद्ध्यु
दितिचेन्न॥तादृशान्वयव्यतिरेकाभ्यांकार्यत्वाद्यवच्छिन्नंप्रतिक्रियात्वेनैवहेतुत्वात्तत्र
चेष्टात्वेनहेतुत्वेमानाभावात्॥आचार्यमतानुयायिनस्तु॥अस्तुचेष्टात्वेनतत्रहेतुत्वंअ
स्तुचतदनुरोधेनेश्वरस्यनित्यशरीरंतथापिनेश्वरस्यातिरिक्तशरीरसिद्धिःपरमाणूना

मेवतच्छरीरत्वोपगमात्॥एवंचेश्वरकृतिजन्यचेष्टावद्भिःपरमाणुरूपशरीरैर्वेतत्तत्कार्यणासु
त्तिः॥परमाणुक्रियायांचेष्टात्वरूपवैजात्यांगीकारात्॥शरीरलक्षणंत्यावयवित्वस्यानिवे
शात्॥नचपरमाणूनांशरीरत्वानुपपत्तिः॥नचनानापरमाणूनांशरीरत्वकल्पनेगौरवा
ल्लाघवेनतत्स्यातिरिक्तशरीरसिद्धिरितिवाच्यं॥तच्छरीरस्यमहत्वेऽभग्नस्यतस्यपाषा
णादौप्रवेशासंभवेनपाषाणांतरवर्त्तिभेकशरीरोत्पादकत्वानुपपत्तिः॥अणुत्वेचदू
रस्थकार्योत्पादकत्वानुपपत्तिरित्याहुरित्यलंपल्लवितेन॥यत्तुपूर्वोक्तस्थापनानुमाने
शरीरजन्यत्वमुपाधिस्तत्रयद्यदीसाध्यव्यापकत्वादंकुरादीसाधनाव्यापकत्वाच्च॥
नचांकुरादीसकर्तृकत्वरूपसाध्यसंदेहेनोपाधेःसाध्यव्यापकत्वसंशयान्नोपाधि

त्वनिश्चयादितिवाच्यं॥तथापिसंदिग्धोपाधित्वस्यदुर्वारत्वात्॥नचतादृशोपाधिसंदेहादितो
व्यभिचारसंदेहःपक्षीयएवसचनप्रतिबंधकइतिवाच्यं॥पक्षीयव्यभिचारसंशयंस्यप्र
तिबंधकत्वादतएवानुकूलतर्कविरहदशायांपक्षेतरत्वंसंदिग्धोपाधिरित्यभिमा
नःग्रंथकृतांसंगच्छतइति॥तन्नकार्यत्वेनकृतित्वेनकार्यकारणभावरूपस्यानुकूल
तर्कस्यसत्वेनकार्यत्वरूपहेतोःसाध्यव्याप्यत्वनिश्चयेनसाध्यव्याप्याव्यापकत्वे
नोपाधेःसाध्याव्यापकत्वनिश्चयादिति॥एवंचोक्तानुमानेनेश्वरसिद्धौतदुच्चरि
तत्वेनवेदस्यप्रामाण्यनिश्चयाद्वेदोपिप्रमाणमित्याहाद्यावाभूमीति॥इत्या
दयइत्यादिनाईश्वरमुपासीत॥यःसर्वज्ञःससर्ववित्॥यस्यज्ञानमयंतपः॥सो

कामयतेत्यादीनांपरिग्रहः॥कार्यपक्षकानुमानंचोपलक्षणं॥सर्गाद्यकालीनंद्व्यणुक
प्रयोजकंकर्म॥प्रयत्नजन्यंकर्मत्वात्॥गुरुत्ववतांपतनाभावः॥पतनप्रतिबंधक
प्रयत्नप्रयुक्तः॥धृतित्वात्॥ब्रह्माऽनाशःप्रयत्नजन्यः॥नाशत्वात्॥घटादिव्यव
हारःस्वतंत्रपुरुषप्रयोज्यः॥व्यवहारत्वात्॥आधुनिककल्पितलिप्यादिव्यवहा
रवत्॥वेदजन्याप्रमाव[illegible]कृतियथार्थज्ञानजन्या॥शब्दप्रमात्वात्॥वेदःअसंसारिपु
रुषप्रणीतःवेदत्वात्॥वेदःपौरुषेयःवाच्यत्वात्॥द्व्यणुकपरिमाणजनिकासंख्या
अपेक्षाबुद्धिजन्या॥एकत्वान्यसंख्यात्वात्॥इत्यनुमानांतरमपिसाक्षात्परंपरयावा
ईश्वरसाधकानीतिबोध्यानि॥तदुक्तं॥कार्ययोजनधृत्यादेःपदात्प्रत्ययतःश्रुतेः॥

वाक्यात्संख्याविशेषाच्च साध्ये विश्वजिदन्ययइति॥आयोजनंकर्म॥पद्यतेगम्यतेऽनेनेति
पदं॥व्यवहारइतिसंक्षेपः॥मूलेशिष्टावधानायप्रतिजानीते॥द्रव्यंगुणइति॥निरूप्य
तइतिशेषः॥संयोगापेक्षयाकर्मणोऽतिरिक्तंनास्तीतिभूषणमतंनिराकर्तुंतथेत्युक्तं
॥यथागुणःपृथक्कृतथाकर्मापीत्यर्थः॥अभावोऽधिकरणात्मकएवेतिप्राभाक
रमतंदूषयितुंपुनस्तथेत्युक्तं॥युक्तिश्चाग्रेवक्ष्यते॥यद्यपिविभागवाक्यस्यन्यूना
धिकसंख्याव्यवच्छेदकतयैवसप्तत्वसंख्यालब्धातथापिसप्तत्वग्रहणंस्पष्टार्थं॥नन्वन्येपदार्थाः
कुतोनोक्ताइत्यतआह॥कीर्तिताइति॥तथाचैतेभ्योऽन्येपदार्थानसंत्येवकणादप्रभृ
तिभिरनुक्तत्वादितिभावः॥नन्वितरेषुग्रंथेषुषडूभावपदार्थासमस्तभावइतिनि

रूपितंतथैवात्रकुतोननिरूपितमित्याशंक्याह॥मुक्तावल्यांसप्तमस्येवेति॥अत्रसमवा
येकार्थसमवायान्यतरसंबंधेनसत्तावत्वंभावत्वंतदभावोऽभावत्वमितिप्राप्तं॥अ
र्थात्प्राप्त॥तेनप्राप्तत्वेन॥एवंगुपन्यासइति॥भावत्वेनोपन्यासइत्यर्थः॥तेषामि
तिशेषः॥नन्वन्येपदार्थाःकथंनसंतिन्यायग्रंथेषोऽशपदार्थनिरूपणादित्याशंक्य
नैय्यायिकानामपिमतेसप्तपदार्थइत्यविरुद्धं॥षोऽशपदार्थानांसप्तपदार्थेष्वे
वांतर्भूतत्वादित्याह॥एतेचेति॥उक्तार्थेभाष्यसंमतिमाह॥प्रतिपादितंचेति॥एवमे
मिवेति॥द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाःसप्तैवपदार्थाः॥षोऽशा
नामत्रैवांतर्भावइतिप्रतिपादितमित्यर्थः॥कथमंतर्भवइतिचेदित्थं॥प्रमाणमेयं

१७ द्रियादेद्रव्ये॥व्याप्तिज्ञानादेर्गुणे॥प्रमेयंस्यात्मशरीरेंद्रियस्वरूपस्यद्रव्ये॥अर्थस्यगंधर
सरूपस्पर्शशब्दरूपस्यगुणे॥बुद्धेर्गुणे॥मनसोद्रव्ये॥प्रवृत्तेर्गुणे॥दोषाणामिच्छाद्वेषमि
थ्याज्ञानस्वरूपाणांरागद्वेषमोहपदप्रतियाद्यानांगुणे॥प्रेत्यभावोजननंमिति
व्युत्पत्त्यामरणोत्तरजन्मत्वंप्रेत्यभावपदप्रवृत्तिनिमित्तं॥चरमप्राणशरीरसंयोगध्वं
सोमरणं॥आद्यशरीरप्राणसंयोगोजन्म॥तथाचमरणोत्तरतादृशसंयोगरूपस्यगुण॥
सुखदुःखसंवेदनरूपमुख्यफलस्यगुणेगौणमुख्यसाधारणजन्यमात्रस्वरूपफलस्या
पिद्रव्यादिषु॥पीडालक्षणस्यदुःखस्यगुणे॥अपवर्गस्तुआत्यंतिकोदुःखनिवृत्तिः
॥दुःखानिशरीरंषडिंद्रियाणिषड्विषयाःषड्बुद्धयःसुखंदुखंचेत्येकविंशतिः॥त

त्रदुःखत्वजातिशून्येशरीरादौदुखसंबंधितयागौणंदुखत्वं॥स्वर्गादिफलस्यापितन्ना
शज्ञानेनदुःखसंबंधित्वमव्याहतमेव॥नचैकविंशतिदुःखांतर्गतयोर्मनःश्रवणयोर्नि
त्यत्वात्कथंतन्नाशइतिवाच्यं॥तद्रूपविशिष्टस्यश्रवणस्यज्ञानहारादुःखहेतुतयादुःखं
तद्रूपकर्णशष्कुल्याःनाशेनविशिष्टश्रवणेंद्रियरूपदुःखनाशात्॥एवमात्मसंयोगरूपव्या
पारविशिष्टस्यैवमनसोज्ञानहारादुःखरूपतयाव्यापारनाशेनतद्विशिष्टमनोरूपदुः
खनाशसंभवादिति॥दुःखनिवृत्तावात्यंतिकत्वंचस्वसमानाधिकरणदुःखासमान
कालीनत्वं॥नन्वेतादृशदुःखध्वंसस्यमुक्तित्वेकथंतत्त्वज्ञानसाध्यतातस्यतिचेदि
स्थं॥तत्त्वज्ञानेनमिथ्याज्ञानवासनानाशः॥वासनानाशेचदोषस्यवासनाविशिष्ट

रागादेरभावः॥शिविषणाभावेविशिष्टाभावात्॥तादृशरागरूपहेत्वभावेच प्रवृत्तेर्धर्माध
र्मरूपयाअभावोऽनुत्पत्तिः॥तदनुत्पत्त्या प्रारब्धकर्माधीनदेहान्यदेहसंबंधरूपजन्माभा
वः॥भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिरिति॥जन्माभावेदुःखानुत्पादः॥तथा
चस्वसमानाधिकरणदुःखासमानकालीनत्वरूपविशेषणंहेतत्त्वज्ञानस्यप्रयोजकत्व
मुक्तेस्तत्त्वज्ञानसाध्यत्वं॥तथाचसूत्रं॥दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानांउत्तरोत्त
रापायेतदनंतरापायादपवर्गइति॥अस्यार्थः॥पठितेषुजन्मादिषुमध्येउत्तरोत्तरापा
यंतदनंतरापायादव्यवहितपूर्वाभावात्॥तथाचतत्त्वज्ञानेनमिथ्याज्ञाननाशः॥
तेनदोषाणांनाशः॥तेनप्रवृत्तेरनुत्पादः॥तेनजन्मानुत्पादः॥तेनदुःखानुत्पादइति॥

पूर्वोक्तएवार्थः पर्यवसितः॥एकविंशतिदुःखनाशस्यस्वकारणसाध्योनतत्रतत्त्वज्ञानस्यप्रयोज
कतेतिवदंति॥नव्यास्तु॥योग्यविभुविशेषगुणनाशेप्रतियोग्युत्तरोत्पन्नगुणेनैवदुःखध्वंसरू
पमुक्तिसंभवेनतत्रतत्त्वज्ञानापेक्षेति॥दुःखपदंदुःखसाधनीभूतदुरितपरतयाव्याख्ये
यं॥दुरितस्यचायोग्यगुणत्वान्नस्योत्तरवर्त्तिगुणनाश्यतेतितन्नाशरूपमुक्तेस्तत्त्वज्ञान
साध्यत्वमेवेत्याहुः॥तथाचैतादृशंपवर्गस्याभावे॥संशयस्यगुणे॥साध्यतज्ज्ञाविषय
रूपस्यप्रयोजनस्ययथायथंद्रव्यादिषु॥साध्यसाधनोभयनिश्चयविषयरूपस्यदृष्टां
तस्ययथायथंद्रव्यादिषु॥तत्तच्छास्त्रसिद्धार्थरूपस्यसिद्धांतस्यव्यादिषु॥शब्दस्वरूपप्र द्र
तिज्ञाद्यन्यतमरूपाणामवयवानांगुणे॥व्याप्यारोपेणव्यापकारोपस्तर्कस्यगुणे॥नि

र्णयस्यगुणः।तत्त्वभुभुत्सयोःकथारूपस्यवादस्यगुणः।विजिगीषोःकथारूपस्यजल्पस्यगुणः।
स्वपक्षस्थापनाहीनकथारूपवितंडायाःगुणः।अनुमितितत्करणान्यतरप्रतिबंधकज्ञानवि
षयरूपाणांहेत्वाभासानांयथायथंद्रव्यादिषु।।अभिप्रायांतरेणप्रयुक्तस्यशब्दस्यार्थां
तरंपरिकल्प्यदूषणाभिधानरूपस्यच्छलस्यगुणः।।असदुत्तररूपजातेर्गुणः।।पराजयहे
तुस्वरूपनिग्रहस्थानानांयथायथंद्रव्यादिषुतभवः।।निग्रहस्थानानि।।प्रतिज्ञाहानिः१प्र
तिज्ञांतरं।२प्रतिज्ञाविरोधः।३प्रतिज्ञासन्यासः।४हेत्वंतरं।५अर्थांतरं६निरर्थकं।७
अविज्ञातार्थं।८अपार्थकं।९अप्राप्तकालं१०न्यूनं।११अधिकं।१२पुनरुक्तं।१३
अननुभाषणं।१४अज्ञानं।१५अप्रतिभा।१६विक्षेपः।१७मतानुज्ञा।१८पर्यनुयो

ज्योपेक्षणं।१९निरनुयोज्यानुयोगः।२०अपसिद्धांतः।२१हेत्वाभासाश्च।२२अत्रचका
रोनुक्तसमुच्चयार्थस्तेनदृष्टांतसाधनवैकल्यादीनांपरिग्रहः।।तत्रविशिष्यप्रतिज्ञातस्य
पक्षादेःपरित्यागरूपप्रतिज्ञाहानेरभावे।।परोक्तदोषोद्भावनार्थंपूर्वोक्तविशेष
णविशिष्टतयाप्रतिज्ञार्थकथनरूपस्यप्रतिज्ञांतरस्यगुणे।।स्वोक्तसाध्यादिविरुद्धत्वा
दिकथनरूपप्रतिज्ञाविरोधस्यगुणे।।स्वोक्तसाध्यादेःपरेणदूषणेकृतेतत्साध्या
पलापरूपप्रतिज्ञासंन्यासस्यगुणे।।परोक्तदूषणोद्भावनार्थंपूर्वोक्तहेतुतावच्छेदकातिरि
क्तहेतुतावच्छेदकविशिष्टकथनरूपहेत्वंतरस्यगुणे।।प्रकृतानाकांक्षिताभिधानरूपार्थां
तरस्यगुणे।।अवाचकपदप्रयोगरूपनिरर्थकस्यगुणे।।परिषत्प्रतिवादिबोधानुकूलो

पक्षित्यजनकवाक्यप्रयोगरूपाविज्ञातार्थस्यगुणे॥अभिमतवाक्यार्थबोधानुकूलाकां
क्षाशून्यपदरूपस्यअपार्थकस्यगुणे॥समयसंबंधविषयीभूतकथाक्रमविपरीतक्र
मणाभिधानरूपस्याप्राप्तकालस्यगुणे॥यत्किंचिदवयवशून्यावयवाभिधानरूप
स्यन्यूनस्यगुणे॥अधिकहेत्वाद्यभिधानरूपस्याधिकस्यगुणे॥पुनरभिधानरूप
स्यपुनरुक्तस्यगुणे॥परिषदात्रिरभिहितस्याप्रत्युच्चारणरूपस्याननुभाषणस्या
भावे॥परिषदाविज्ञातार्थस्यवादिनात्रिरभिहितस्याप्यविज्ञानरूपस्याज्ञानस्या
भावे॥उत्तरार्थंपरोक्तंबुध्वापिउत्तरासाप्रतिपत्तिरूपायाःअप्रतिभायाःअभावे॥
असंभवत्कालांतरकार्यव्यासंगमुद्भाव्यकथाविच्छेदरूपस्यविक्षेपस्याभावे॥स्व

पक्षेदोषमनुद्धृत्यपरपक्षेदोषाभिधानरूपमतानुज्ञायाःगुणे॥निग्रहस्थानंप्राप्तवतो
निग्रहस्थानानुद्भावनरूपस्यपर्यनुयाज्योपेक्षणस्याभावे॥निग्रहस्थानानवसरे
तन्निग्रहस्थानाभिधानरूपनिरनुयोज्यानुयोगस्यगुणे॥कथायांस्वीकृतसिद्धां
तप्रत्यवरूपस्यापसिद्धांतस्याभावे॥हेत्वाभासानांपूर्वोक्तलक्षणानांद्रव्यादिषं
तर्भावइति॥भाष्यस्यार्षत्वमाशंक्यगंगेशोपाध्यायानांसम्मतिमाह॥अतएवेति॥
मण्यादिसमवधानेसतिवन्हिनादाद्योत्पत्तिवारणायमण्यादेःकारणविघटकत्व
रूपाप्रतिबंधकतावाच्या॥साचवन्निनिष्ठदाहानुकूलशक्तिरूपकारणविघट
कतयैवनिर्वहतीतिमण्यादिप्रतिबंधकत्वान्यथानुपपत्यासिद्धायाःशक्तेःषड्भा

वानंतर्भूतत्वादतिरिक्तत्वमितिपदार्थाःसप्तकीर्त्तिताइतिमूलमयुक्तमित्यभिप्रायेणप्राभाकरःशंकतेनन्वि
तिं॥अतिरिक्तेति॥सप्तपदार्थातिरिक्तेत्यर्थः॥अतिरिक्तपदार्थतामेवव्यवस्थापयति॥तथाहीत्यादिना॥
मण्यादीत्यादिनामन्त्रौषध्यादिपरिग्रहः॥समवहितेनसमीपवृत्तिना॥ननुवह्निरूपकारणाभावा
देवनदाहइतिनमण्यादेःप्रतिबंधकत्वमतःसमवहितेनवह्निनेति॥दाहोरूपांतरोत्पत्तिः॥पूर्वरू
पपरावृत्तिर्वा॥मण्याद्यतिरिक्तस्यप्रतिबंधकत्वंखंडयति॥तच्छून्येनेति॥मणिसमवधानशून्ये
नेत्यर्थः॥ननुवन्नोयदिदाहानुकूलाशक्तिस्तदामण्यादिसत्वेकुतोनदाहस्तत्राह॥तत्रेति॥पूर्वोक्त
युक्त्याशक्तिसिद्धावित्यर्थः॥दाहानुकूलेति॥अत्रानुकूलत्वंचकारणकारणतावच्छेदकसाधारण
॥तेनशक्तेःकारणतावच्छेदकत्वेपिनक्षतिः॥नाश्यतइत्यस्यकर्त्तव्यतइत्यनेनान्वयः॥तथाचव
ह्निनिष्ठशक्तित्वावच्छिन्नंप्रतिमणित्वेननाशकत्वस्वीकारेणमण्यादिसत्वदशायांशक्तेरभावा

सांब २१

देवनदाहइतिभावः॥ननुमण्यादेर्यदिशक्तिनाशकत्वंतदासत्युत्तेजकविशिष्टमण्यादेरपसारितेवादा
हानापत्तिरित्यतआह॥उत्तेजकेनेति॥मण्याद्यपसरणेनचेत्यत्रचकारोवाकारार्थः॥दाहंप्रतिमण्या
भावत्वेनहेतुत्वकल्पनान्नमणिसमवधानकालेदाहापत्तिरितिवाच्यं॥मण्यभावत्वेनरूपेणस्यात्
त्रहेतुताकल्पनेगौरवात्॥विलक्षणशक्तिमत्वेनवह्नेःकारणत्वकल्पनस्यैवोचितत्वात्इ
त्यभिप्रायात्॥नन्वेवंशक्तिसिद्धावपितस्यातिरिक्तत्वासिद्धिरितिचेन्न॥उक्तपदार्थेष्वनंतभू
तत्वात्॥तथाहि॥नतावद्द्रव्यात्मिकाशक्तिःगुणादिवृत्तित्वात्॥अतएवनगुणात्मिकाकर्मात्मि
कावा॥नचसामान्याद्यन्यतमरूपा॥उत्पत्तिमत्वेसतिविनाश्यत्वादिति॥एवमतिरिक्तोशक्तिप
दार्थोधुनासदृश्यस्यातिरिक्तपदार्थतांव्यवस्थापयति॥एवमित्यादिना॥अतिरिक्तइति॥क्ष
त्रसप्तपदार्थातिरिक्तइत्यर्थः॥बह्वीवानंतभूतत्वेसत्यभावानंतभूतत्वादितिहेतुःपूरणीयः॥

तत्रसत्यंतासिद्धिंनिरस्यति॥तद्धीति॥सादृश्यंहीत्यर्थः॥सामान्येपीति॥सामान्येतरवृत्तित्वेसति
सामान्यवृत्तित्वादित्यर्थः॥तेनसामान्यत्वेनव्यभिचारः॥व्यतिरिक्तेत्वेसतिविशेषणान्नप्र
मेयत्वादौव्यभिचारः॥भावत्वेचद्रव्यादिषद्कान्यतमत्वरूपहेतुमत्तिसाध्यसमत्वान्नव्यभिचा
रइति॥यथेति॥यदिसादृश्यंद्रव्यादावनंतभूतंतदाद्रव्यादेःसामान्यावृत्तित्वेनयथागोत्वंनि
त्यंतथाश्वत्वमित्यबाधितप्रतीतिर्नस्यादित्यर्थः॥अभावेनभावमा ंक्ष्यनिराचष्टे॥नापी
ति॥यद्यप्यतिरिक्ताभावानंगीकुर्वतःप्राभाकरस्यमतेऽभावेनभावचिंतानसंभवति॥तथापि
परमतमभ्युपेत्येदंनिराकृतमितिभावः॥सत्वेनभावत्वेन॥प्रतीयमानत्वात्प्रमीयमानत्वात्॥म
णिसमवधानकालीनवह्निनादाहवारणायप्राभाकरेणसाधितांशक्तिंदूषयति॥मण्याद्यभा
वेति॥अतिरिक्तशक्ति॰कल्पनापूर्वोक्तनाश्यनाशकभावकल्पनापेक्षयालोचवाद्दृत्वावच्छि

न्नंप्रतिमण्यभावविशिष्टवह्नित्वादिनैवहेतुताकल्पनमुचितमितिभावः॥होदोदिकमित्यादिपदेनव
ह्निसंग्रहः॥मणिसत्वेचवह्नेरप्युत्पत्तेः॥तथाचमणिरूपप्रतिबंधकसत्वेनदाहवन्नीतिभावः॥ननु
यदाकदाचिन्मण्यभावविशिष्टाद्दाहापत्तिः॥कारणतावच्छेदकावलीढकारणसत्वस्येवकार्यो
त्पत्तिनियामकत्वात्॥मण्यभावविशिष्टवह्नित्वंवह्निविशिष्टमण्यभावोवाकारणतावच्छेदकमि
त्यत्रविशेषणविशेष्यभावेविनिगमनाविरहेणगुरुभूतकार्यकारणभावदूषणप्रसंगेत्यतआह
॥मण्याद्यभावादेरिति॥तथाचप्रतिबंधकत्वंनकार्यानुकूलधर्मविघटकत्वं॥बाधज्ञानस्यानुमि
तिप्रतिबंधकत्वाभावापत्तेः॥किंतुकारणीभूताभावप्रतियोगित्वं॥तच्चमण्यभावस्यहेतुत्वेएवो
पपद्यते॥नत्वतिरिक्तशक्तिसत्वेइतिभावः॥ननुप्रतिबंधकत्वस्येतादृशत्वेकारणीभूतवह्निरूपा
भावप्रतियोगिवन्मण्यभावेऽतिव्याप्तिः॥स्वप्रागभावप्रतियोगिनिष्ठत्वादौचेतिचेन्न॥तादात्म्या
तिरिक्तसंबंधावच्छिन्नायाकारणतातदाश्रयीभूतोभावभिन्नोऽत्यंताभावस्तत्प्रतियोगित्वस्य

विवक्षितत्वात्॥कारणतावि शेषोपादानाच्चस्वात्यंताभावप्रत्यक्षेस्वस्य प्रतिबंधकत्वापत्तिःपरास्ता
॥विषयस्यतादात्म्यसंबंधेनैवप्रत्यक्षेहेतुत्वात्॥ननुवह्निमण्यभावयोर्द्वयोर्हेतुत्वापेक्षयाऽतिरिक्त
शक्तेरेकस्याएवहेतुतायुक्तालाघवादित्यतआह॥अनेनैवेति॥दाहादिकंप्रतिमण्यभावादेर्हेतुत्व
कल्पनेनैवेत्यर्थः॥सामंजस्ये॥मणिसमवधानदशायादाहवारणे॥प्रागभावेमानाभावोदाह सोब
॥ध्वंसेति॥इदमुपलक्षणं॥प्रतियोगिध्वंसयोःशक्तिनाशमण्योः॥शक्तिमण्यपसारणयो २३
श्चकार्यकारंभावकल्पनापिस्यादित्यपिबोध्यं॥उत्तेजकाभावेतिं॥तथाचकेवलमणिर्न प्र
तिबंधकःकिंतूत्तेजकाभावविशिष्टस्तदभावश्चोत्तेजकसमवधानकालेतिष्ठतीतिनव्यभिचा
रः॥अथमण्यादिरूपलीलीयदाहंप्रतिउत्तेजकस्यैवहेतुतास्तितिचेन्न॥तस्यानुगतत्वात्॥ता
वद्भावकूटविशिष्टमण्यभावस्यचानुगतत्वात्॥अत्रेदंबोध्यं॥अभावीयविशेषणतासंब
धेनदाहत्वावच्छिन्नंप्रत्युद्देश्यत्वदैशिकविशेषणत्वान्यतरसंबंधावच्छिन्नप्रतियोगितानि का

तन्नदुत्तेजकाभावानांसामानाधिकरंण्यरूपंयद्वैशिष्ट्यंतदवच्छिन्नस्यमण्यादेर्दैशिकविशेषणता
संबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषणतासंबंधेनहेतुत्वमिति॥तेनसंयोगसंबंधा
वच्छिन्नप्रतियोगिताकमण्यभावस्यतत्संयुक्तेपिसत्वाद्दाहापत्तिः॥नन्वनुमानमेवशक्तौप्रमा
णं॥तथाहि॥वन्हिर्दाहानुकूलाद्रव्यत्वातींद्रियधर्मसमवायि॥दाहजनकत्वादात्मवदिति॥वन्हित्वेन
कैकत्वमादायभर्जनकपालस्थवन्हिनिष्ठानुद्भूतरूपमादायवासिद्धसाधनवारणायदाहानुकू
लेति॥वन्हित्वेनकेंधनसंयोगमादायादृष्टवह्नेःसंयोगमादायचातद्वारणायादृष्टेति॥व
न्हिनिष्ठोष्णस्पर्शमादायतद्वारणायातींद्रियेतिइतिचेन्नविपक्षबाधकतर्कविरहेणास्यानु
मानस्याप्रयोजकत्वात्॥केचित्तु॥वन्हिप्रतित्वेनफूत्कारसंयोगादीनांत्वेनफूत्कारसंयोग
त्वादिरूपेणकारणतायाःव्यभिचारेणासंभवादतिरिक्तशक्तिसिद्धिः॥नचत्वेनफूत्कारयोर
रणिनिर्मंथनयोर्मणितरणिकिरणयोश्चसंबंधस्यजन्यतावच्छेदकंवह्नित्वेनैवजात्यत्रयंक

त्व्यमितिनव्यभिचारइतिवाच्यं॥तज्जन्यतावच्छेदकंवैजात्यत्रयकल्पनापेक्षयातत्तत्संबंधानामेक
शक्तिमत्वेनकारणत्वकल्पनायागरवलघुत्वेनन्याय्यत्वादित्याहुः॥तन्नतत्तत्संबंधसाधारणैकजा
तिरेवाभ्युपगमात्॥नचयोग्यवृत्तिजातेर्योग्यत्वापत्तिरितिवाच्यं॥दोषविशेषेणशक्तेरिवयोग्य
ग्यत्वकल्पनात्॥नचनोदनत्वादिनासंकरः॥तस्यादोषत्वात्॥अन्यतमत्वेनकारणतासंभ
वाच्च॥नचान्यतमत्वघटकभेदानांमिथोविशेषणविशेष्यभावेविनिगमनाविरहेणकारणता
वच्छेदकभेदात्कारणतावाहुल्यमितिवाच्यं॥कारणतावच्छेदकानांसमनियतानांभेदानामे
क्येनकारणतावच्छेदकैक्यसंभवात्॥नचभेदानांस्वरूपतोऽवच्छेदकत्वासंभवेनतत्प्रयु
क्तसंयोगभेदविशिष्टारणिनिर्मथनसंबंधभेदविशिष्टमणितरणिकिरणसंबंधभेदावच्छि
न्नप्रतियोगिताकभेदत्वादिनाऽवच्छेदकत्वंवक्तव्यं॥तथाचावच्छेदकतावच्छेदकभेदादव
च्छेदकताभेदस्तद्भेदेनचकारणताभेदइतिवाच्यं॥स्वरूपसंबंधरूपायाःअतिरिक्तायाः

कारणतायाःअवच्छेदकताभेदेप्यभेदादित्यन्यत्रविस्तरः॥परेतु॥त्वंगादिसंबंधकालीनवायुसं
योगादीनामेकशक्तिमत्वेनहेतुतामादायविनिगमनाविरहान्नशक्तिसिद्धिरित्याहुः॥यदाशंकि
तंसादृश्यमप्यतिरिक्तपदार्थइतितदपिनिराकरोति॥सादृश्यमपीति॥तद्भिन्नत्वेसतीति
॥इदंचसादृश्यनिरूपकेऽतिव्याप्तिवारणाय॥अनुयोगितासंबंधविवक्षणेतुनदोषमे
व॥तद्गतभूयोधर्मवत्त्वमिति॥तत्रासाधारण्येनविद्यमानायेभूयांसोधर्मास्तद्वत्त्वमित्यर्थः
॥नन्विदंगगनंगगनाकारंसागरःसागरोपमःरामरावणयोर्युद्धंरामरावणयोरित्यादाव
व्याप्तमितिचेन्न॥तद्वृत्तिधर्ममात्रस्यतत्रविवक्षितत्वात्॥युगभेदविवक्षयाभेदसत्त्वाद्वा
॥अतएवयुगभेदविवक्षायामिहोपमालंकारः॥अन्यथाअनन्वयालंकारइत्युक्तमा
लंकारिकैः॥सादृश्यघटकधर्मश्चक्वचिज्जातिरूपोयथाघटसदृशःपटइत्यादौ॥क्वचिदुपा
धिरूपोयथागोत्वंनित्यंतथाश्वत्वमपीत्यादौ॥यथावाचंद्रसदृशंमुखमित्यादावाह्लादकत्वा

दि॥अतिरिक्तकल्पनेगौरवादिति॥न्यास्तु॥सादृश्यमतिरिक्तमेव॥नचातिरिक्तत्वेपदार्थविभा
गव्याघातइतिवाच्यं॥तस्यसाक्षात्परंपरयावातत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात्॥
एवमधिकरणत्वमपि॥तस्यसंयोगादिस्वरूपत्वेबदरकुंडसंयोगस्यहिनिष्कर्षेणबदरमिति
बदरेकुंडमित्यपिप्रयोगःस्यात्॥एवंप्रतियोगित्वमपीत्याहुः॥सादृश्यलक्षणेलक्ष्येयोज्य
त्वं॥यथेति॥स्त्रियांक्तिनितिसूत्रविहितक्तिनप्रत्ययांतक्षितिशब्दस्यक्षयवाचकत्वात्क्षि
तिशब्दस्यप्रकृतोपयोगिनमर्थमाह॥क्षितिःपृथिवीति॥अपूशब्दस्यअपत्रन्त्रजित्या
दिपाणिनीयसूत्रेशब्दपरत्वादाह॥आपोजलानीति॥प्रतापस्यापितेजःपदवाच्यत्वात्प्रकृ
तेतेजःपदार्थंदर्शयति॥वन्हिरिति॥वन्त्यादित्यर्थः॥देवविशेषस्यापिमरुच्छब्दवाच्यत्वेन
प्रकृतोपयोगिनमर्थमाह॥मरुद्वायुरिति॥व्योमशब्दस्यवेदेब्रह्मणिप्रयोगादाह॥व्योमआ
काशइति॥अंतकस्यापिकालशब्दवाच्यत्वात्प्रकृतोपयोगिनमर्थमाह॥कालःसमयइति

देहविशिष्टार्थकदेहिशब्दादेहावयवानामुपस्थितेराह॥देहीआत्मेति॥अथेश्वरस्यदेहिनांमध्येनंत
र्भावात्कथंद्रव्यत्वमितिचेन्न॥वृद्धाभूतावेशन्यायेनईश्वरस्यशरीरमिच्छंति॥संसार्यदृष्टवशाच्छ
रीरमित्यन्ये॥अतएवास्वरसादात्मेति॥एथिव्यप्तेजोवायवात्मनइतिपंचैवद्रव्याणि॥व्योमादेरी
श्वरात्मन्येवांतर्भावात्मनसश्चासमवेतभूतेतंतर्भावादितिनवीनाभाहुस्तन्मतंनिराकर्त्तुंसं
ख्याबोधकपदपूरणेनार्थमाह॥एतानिनवेति॥व्योमस्तावच्छब्दाश्रयतयासिद्धिः॥नचभ
गवतएवशब्दाश्रयत्वंप्रत्येकंजीवमादायविनिगमनाविरहात्॥नचजीवानामाश्रयत्वेश
ब्दानहमितिप्रत्यक्षापत्तिः॥अदृष्टवद्योग्यत्वस्यैवकल्पनात्॥कालदिशोस्फु॥एतस्मिन्
कालेघटःपूर्वस्यांदिशिघटइत्याद्यनुगताकारप्रत्ययात्॥मनसश्चासमवेतभूतत्वेपार्थिवा
दित्रसरेणूनादायविनिगमनाविरहइत्याशयः॥अधिकमग्रेव्यक्तीभविष्यति॥मूलेद्रव्याणी
ति॥द्रव्यपदंद्रव्यत्वरूपजातिविशिष्टार्थकंनतुगुणत्वाश्रयविशिष्टार्थकंगौरवात्॥मुक्तावल्यां

किंप्रमाणमितिकिंशब्दःप्रश्ने॥ननुद्रव्यंद्रव्यमित्यनुगतप्रतीतिरेवजातिसाधिकाभविष्यतीत्यतआ
ह॥नहीति॥तत्रद्रव्यत्वजातौ॥घृतेति॥तथाचघृतादिषुपामराणांद्रव्यत्वज्ञानाभावेनसकलद्रव्य
साधारणद्रव्यत्वजातिसिद्धिर्नभवतीतिभावः॥कार्येति॥कार्यत्वंप्रागभावप्रतियोगित्वं॥नच
ध्वंससाधारण॥सत्वेनविशेषणीयत्वात्॥अत्रचकार्यस्यसमवायःप्रत्यासत्तिः॥कारणस्यता
दात्म्यं॥यत्रसमवायेनकार्यंतत्रतादात्म्येनद्रव्यमितिनियमात्॥ननुजन्यसत्वरूपकार्यत्वावछि
न्नंप्रतितादात्म्येनद्रव्यत्वेनकारणत्वमानाभावः॥नचनीलेनीलोत्पत्तिवारणायतथाहेतुत्वमाव
श्यकमितिवाच्यं॥समवायेननीलंप्रतिस्वाश्रयसमवेतद्रव्यत्वसंबंधेननीलहेतुतयैवतद्वार
णात्॥कार्यत्वस्यकार्यतावच्छेदकत्वेगौरवात्कालिकसंबंधेनघटत्वादिकमादायविनिग्म
नाविरहाच्चेत्यतआह॥संयोगस्येति॥अत्रचरूपादिगुणानांसकलद्रव्यसाधारण्याभावेनद्र
व्यकार्यतायापरित्यागः॥सकलद्रव्यवृत्तिसंख्यादित्रयस्यचगगनादिवृत्तिसंख्यादित्रयस्य

नित्यत्वात्॥नचसंयोगत्वावछिन्नंप्रतिद्रव्यत्वेनसमवायिकारणत्वेमानाभावः॥तत्तद्व्यक्तिसम
वेतसामान्यंप्रतितत्तद्व्यक्तित्वेनसमवायिकारणस्यावश्यकतयागुणादौतदुत्पादासंभवादितिवा
च्यं॥कार्यमात्रवृत्तिजातेःकार्यतावच्छेदकत्वमितिनियमेनतादृशकार्यकारणत्वस्यावश्यक
त्वात्॥नित्यसंयोगांगीकर्तृमतसाधारण्येनाह॥विभागस्येति॥द्रव्यत्वसिद्धेः॥जातिरूपद्र
व्यत्वसिद्धेः॥क्वचित्तथैवपाठः॥अत्रयद्यपिगुणत्वेनान्यथासिद्धिःसंभवतितथापिसाक्षात्संब
धस्यधर्मबाधेसत्येवानुमितेःपरंपरासंबंधविषयत्वमुचितमितिभावः॥इदमुपलक्षणं॥द्र
व्यवत्तिद्रव्यांतरानुत्पत्तिसमवायेनद्रव्यस्यप्रतिबंधकत्वंकल्पनीयमितिप्रतिबंधकतावच्छे
दकतयाद्रव्यत्वसिद्धिः॥प्रतिबध्यतावच्छेदकंचपृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वमेवनि
त्यव्यावर्त्तकत्वात्॥भूतत्वस्यप्रतिबंधकतावच्छेदकत्वेतुमूर्त्तत्वस्यतथात्वमादायविनिगमना
विरहापत्तिः॥द्रव्यत्वस्यप्रतिबंधकतावच्छेदकत्वेतुधर्मिग्राहकमानसिद्धं॥नचतस्यगगना

दिवृत्तित्वेमानाभावइतिवाच्यं॥भूतत्वेनतुल्यव्यक्तिवृत्तिकत्वापत्त्याविनिगमनाविरहेणगगनादि
वृत्तित्वाभ्युपगमात्॥नचभूतत्वेनतुल्यव्यक्तिवृत्तित्ववारणायमनोवृत्तित्वमेवद्रव्यत्वेकल्प्यतांगग
नादिवृत्तित्वकल्पनेगौरवात्॥गगनादिवृत्तित्वकल्पनेपिमूर्त्तत्वेनसांकर्यवारणायमनोवृत्तित्वा
वश्यकत्वादितिवाच्यं॥तथासतिमूर्त्तत्वज्ञानाद्द्रव्यत्वस्यतुल्यव्यक्तिवृत्तित्वापत्तिरिति॥ननु
तमसःदृश्यमद्रव्यस्यसत्वान्नवद्रव्याणीत्ययुक्तमित्यभिप्रायेणमीमांसकःशंकते॥नन्विति
॥ननुतमसिमानाभावोदेवानायुक्तमित्याशंकायांतमःसाधकप्रत्यक्षंप्रमाणमाह॥तद्धी
ति॥तमोहीत्यर्थः॥प्रत्यक्षेणचक्षुरिंद्रियेण॥ननुतमसःसिद्धावपितस्यद्रव्यत्वेकिंमानमित्या
शंक्यानुमानंप्रमाणमाह॥तस्येति॥तमसइत्यर्थः॥चकारोद्रव्यत्वमित्यनेनान्वेति॥तथाचतमो
द्रव्यंरूपवत्वादित्यनुमानेतमसोद्रव्यत्वेसूचितं॥इदमुपलक्षणं॥परत्वापरत्वाश्रयत्वादित्यपि
बोध्यं॥इदंतमःपरमिदमपरमितिप्रतीतेः॥ननुतमसिमानाभावः॥नचनीलंतमइतिप्रती

त्यातत्सिद्धिरितिवाच्यं॥प्रतीतेर्भ्रांतित्वादतोहेत्वंतरमाह॥कर्मवत्वादिति॥कर्मवत्वंसमवायसंबंधेन
विवक्षितं॥तेनजन्यमात्रस्यकालिकसंबंधेनकर्मवत्वेपिनव्यभिचारः॥नचस्वरूपासिद्धिः॥चल
तिक्षायेतिप्रतीत्याकर्मवत्वसिद्धेः॥तमसःकृष्णद्रव्येघंतर्भावंनिराकुरुते॥तद्धीत्यादिना॥गंधेति
गंधाभावस्यहेतुत्वोक्तौपटगतगंधप्रतियोगिकाभावमादायघटेव्यभिचारोऽतःशून्यत्वमुक्त
हेतुश्चप्रतियोगिव्यधिकरणःसमवायसंबंधावच्छिन्नप्रतियोगिताकोपिबोध्यः॥तेननीत्य
त्तिकालीनसंयोगसंबंधावच्छिन्नगंधाभाववतिवाघटेव्यभिचारः॥नीलरूपेति॥अनुगते
निकेवनीलरूपेणजलादिषट्कभेदसिद्धेः॥स्निग्धाभावभास्वररूपाभावादीनामननुगतानां
हेतुतयानोपन्यासः॥जलादिकमित्यादिनातेजःप्रभृतिद्रव्यसंग्रहः॥तथाचनवरूपद्रव्येघंतर्भा
वासंभवेनपरिशेषेणतमसोऽतिरिक्तद्रव्यत्वसिद्धिरितिभावः॥तदुक्तं॥तमःखलुचलन्नीलं
परापरविभागवत्॥प्रसिद्धद्रव्यवैधर्म्यान्नवभ्योभेत्तुमर्हतीति॥ननुतमसोद्रव्यत्वेआलोक

निरपेक्षेणचक्षुरिंद्रियेणग्रहोनस्यात्॥द्रव्यत्वहेत्वालोकसापेक्षचक्षुरिंद्रियस्यहेतुत्वादित्यतआ
ह॥तत्प्रत्यक्षेचेति॥तमःप्रत्यक्षेचेत्यर्थः॥तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्नप्रतिएवसंयोगसं
बंधेनालोकत्वेनकारणत्वावधारणादिति भावः॥आवश्यकतेजोभावेनेति॥प्रकृष्टमहत्तेजो
ज्ञानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः॥अंधकाराभावएवतेजः किंनस्यादितिनु
नमस्यकृ॥उष्णस्पर्शभास्वररूपलुब्धेरनुपपत्तेरितिसूचनायावश्यकपदं॥उपपत्तौ॥तमोव्य
वहारोपपत्तौ॥ननुतमसस्तेजोभावत्वेरूपवत्ताप्रतीतिः कथम भावेरूपाभावादित्यतआह
॥रूपवत्तेति॥ननुरूपवत्ताप्रतीतेर्भ्रांतत्वेपिचलतीतिप्रत्यक्षसिद्धकर्मवत्वहेतुनातमसिद्र
व्यत्वंसेत्स्यतीतिअतआह॥कर्मवत्ताप्रतीतिरपीति॥नहिद्रव्येऽन्योपाधिकीकर्मप्रतीति
रितिभावः॥ननुप्रतीतेर्भ्रांतत्वंतत्रैवस्वीक्रियतेयत्रोत्तरकालेबाधज्ञानंप्रकृतेचतमोन
चलतीत्युत्तरकालेबाधज्ञानाभालक्ष्यंप्रतीतेर्भ्रांतत्वमित्यतोदूषणांतरमाह॥तमसइति॥

अवयवादीत्यादिनाऽवयविध्वंसपरिग्रहः॥यत्वारोपितंनीलंतमइतिकंदलीकारमतं॥तन्न॥इहां
धकारइतिप्रतीतेर्भ्रमत्वापत्तेः॥तमोनीलंनतुनीलमितिप्रत्ययाच्च॥ननुतमसोऽनतिरिक्तत्वेपिसुवर्ण
स्यातिरिक्तद्रव्यस्यसत्वान्नवत्वव्याघातस्तदवस्थएवेत्यतआह॥सुवर्णस्येति॥वक्ष्यतइति॥तेजोनि
रूपणावसरइतिशेषः॥कंठतइति॥रूपरसगंधस्पर्शसंख्यापरिमाणानिपृथक्संयोगविभागौपर
त्वापरत्वेबुद्धिःसुखदुःखेच्छाद्वेषप्रयत्नाश्चगुणइतिविभागसूत्रेसप्तदशकंठोक्ताः॥चशब्देन॥सूत्र
स्थचशब्देन॥गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाःसप्तसमुचिताः॥तेचसर्वैकतयाचतुर्वि
शतिगुणाइतिव्यवहृताः॥ननुचतुर्विंशतौकिन्नामगुणत्वेनचजातिविशेषस्तत्रप्रमाणाभावादि
त्यतआहतत्रेति॥तेषुगुणेष्वित्यर्थः॥अत्रेगुणनिरूपणावसरे॥वक्ष्यतइति॥द्रव्यकर्मभिन्ने
सामान्यवतियाकारणतासाकिंचिद्धर्मावच्छेदेनकारणतात्वादित्यनुमानंगुणत्वजातौप्रमाण
मितिभावः॥एतत्तत्वंतत्रैवस्फुटीभविष्यति॥प्रत्यक्षसिद्धेति॥चलतीत्याकारानुगतप्रत्य

यरूपेत्यर्थः॥अधिकृत्येति॥कर्मविभाजकोपाधिभिर्भ्रमणत्वादिभिः॥मूलेगमनादेवेति॥अथैवमुक्षेपणादीनामपिगमनादेवलाभेउत्क्षेपणादिभिरपिविभागोऽनुचितः॥नहिउत्क्षेपणादौगमनलेनानुभाविकं॥ऊर्ध्वमधश्चप्रक्षिप्तलोष्टादौऊर्ध्वंगच्छत्यधोगच्छतीतिप्रत्ययादितिचेन्न॥स्वतंत्रेच्छस्यमुनेर्नियोगपर्यनुयोगानर्हत्वादिति॥तृतीयंतिति॥लक्षणप्रयोजनंतुइतरभेदस्यव्यवहारस्यवासिद्धिः॥सामान्यमितरेभ्योभिद्यतेसामान्यमितिव्यवहारविषयोवानित्यत्वेसत्यनेकसमवेतत्वात्॥यन्नैवंतन्नैवं॥यथाद्रव्यमिति॥एवंलक्षणांतरेप्यूह्यं॥समवेतत्वंघटकसमवायफलमाह॥नित्यत्वेसत्यनेकवृत्तित्वमिति॥नचैवंनित्यसंयोगेअतिव्याप्तिरितिवाच्यं॥तस्यनिरस्तत्वात्॥कुतोनिरासइतिचेन्न॥द्रव्यनिरूपितसंयोगनिष्ठकार्यतावच्छेदकोटौजन्यत्वनिवेशेगौरवान्नित्यसंयोगांगीकर्तृनयेसंयोग

त्वस्यनित्यवृत्तित्वेनकार्यतानवच्छेदकत्वात्॥तुल्ययुक्त्यानित्यविभागसिद्ध्यापत्तेश्च॥नन्वाकाशत्वजातावव्याप्तिस्तस्यानेकसमवेतत्वाभावादित्याशंक्यालक्ष्यत्वेनोत्तरमाह॥एकमात्रेति॥व्यक्त्यभेदरूपबाधकसत्वादितिशेषः॥अनुगतधियोजातिकल्पिकायाअभावादितिभावः॥ननुव्यक्त्यभेदस्यजातिबाधकत्वमेवासिद्धं॥निःसामान्यत्वेसतिविशेषान्यत्वेसतिसमवेतत्वस्यजातिलक्षणत्वादित्यतःसम्मतिमाह॥नथाचोक्तमिति॥द्रव्यकिरणावल्यामुदयनाचार्यैरितिशेषः॥बहुवृत्त्येकधर्मस्यैवसामान्यतयासर्वसिद्धत्वादेकव्यक्तौजातिरनभ्युपेयेतिभावः॥व्यक्तेरभेदः॥एकव्यक्तिकत्वं॥आकाशत्वादेर्जातित्वेबाधकं॥तुल्यत्वंतुल्यव्यक्तिवृत्तित्वं॥घटत्वकलशत्वादीनांजातीनांभेदे॥वस्तुतस्तु॥तुल्यत्वंतुल्यव्यक्तिवृत्तित्वं॥स्वभिन्नजातिसमनियतत्वमितियावत्॥नचैवंजातिबाधकमेवेतिध्येयं॥संकरस्तुपरस्परात्यंताभा

वसमानाधिकरणयोरेकत्रसमावेशः॥भूतलादेर्जातित्वे॥भूतत्वंविहायमनसिवर्त्तमानस्यमूर्त्तत्वस्यमूर्त्तत्वंविहायगगनेवर्त्तमानस्यभूतत्वस्यपृथिव्यादिचतुष्टयसत्त्वेऽपि॥ननुसांकर्यस्यजातिबाधकत्वेकिंमानमितिचेन्न॥स्वसामानाधिकरण्यस्वाभावसामानाधिकरण्योभयसंबंधेनजातिविशिष्टजातित्वावच्छेदेनस्वसमानाधिकरणाभावप्रतियोगित्वाभावनियमस्यभंगप्रसंगएवेति॥एतादृशनियमेमानाभावान्नसांकर्यंजातिबाधकमितितुन्यायः॥अनवस्थातुजातेर्जातिमत्त्वे॥यद्यपिनिखिलजातिष्वेकंवैजात्यंनाङ्गीकारेपितद्वैजात्येनवैजात्यांतरमेकव्यक्तिकत्वान्नथापिनिखिलजातिष्वेकंवैजात्यंतद्वैजात्यतदाश्रयजातिषुपुनर्वैजात्यमेवमग्रेपिअनवस्थादुर्बोध्या॥रूपहानिः॥निःसामान्यत्वगर्भलक्षणव्याघातरूपाविशेषजातिमत्त्वे॥रूपस्यस्वतोव्यावर्त्तकत्वस्यहानिः॥तत्रजातिस्वीकारेतयैवव्यावर्त्तकत्वंवाच्यं॥सामान्याश्रयस्यसामान्यरूपेणैवभेदसाधकत्वमितिनियमात्॥नचसामान्यरूपेणविशेषाणांभेदसाधकत्वंसंभवति॥व्यभिचारात्॥नादृशनियमानंगीकोरेपरमाणुगतैकत्वादीनांतत्तद्व्यक्तित्वेनैवपरमाण्वंतरभेदसाधकत्वसंभवेनविशेषस्यवैयर्थ्यप्रसंगादितितुज्यायः॥असंबंधः॥प्रतियोगितातुयोगितान्यतरसंबंधेनसमवायाभावः॥समवायाभावयोर्जातिमत्त्वे॥तदपेक्षयाचेति॥सत्तापेक्षयाचेत्यर्थः॥सत्ताजातिश्चद्रव्यंगुणःसन्नित्याद्यनुगतप्रतीत्यैवसिध्यति॥अत्रनव्याः॥सन्नितिप्रतीतिविषयोभावत्वमेव॥अतएवसामान्यादिष्वपिसदितिव्यवहारः॥नत्वतिरिक्तद्रव्यादित्रिकवृत्तिःसत्ताख्याजातिरिति॥तेनपरमपरंचेतिद्विविधंसामान्यंपरंसत्तेतिवैशेषिकविभागोनिर्युक्तिकतादृङ्नादेयइत्याहुस्तन्नसत्॥ध्वंसकारणतावच्छेदकतयासत्ताजातिसिद्धेः॥यत्रप्रतियोगितासंबंधेनध्वंसोत्पत्तिस्तत्रतादात्म्यसंबंधेनसदितिसामानाधिकरण्यप्रत्यासत्याकार्यकारणभावात्॥नचप्रागभावेव्यभिचारःप्रागभावेसत्ताविरहादितिवाच्यं॥प्रागभावावृत्तिप्रतियोगिताभिन्नप्रतियोगितायाःकार्यतावच्छेदकसंबंधत्वादिति॥वस्तुतस्तु॥सत्तावच्छिन्नंप्रतितादात्म्यनद्रव्यत्वेनकारणतया

जन्यतावच्छेदकतयासत्ताजातिसिद्धिः॥तादृशकार्यकारणभावेमानाभावइतितुतन्न॥स्वाश्रयसम
वेतत्वसंबंधेननीलादेर्नीलादावपिसत्वात्तत्रनीलापत्तिवारणायतादृशकार्यकारणभावस्याव
श्यकत्वात्॥नचस्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबंधेननीलादेर्हेतुतयैवनतदापत्तिरि
तिवाच्यं॥तादृशसमवेतत्वद्रव्यत्वयोर्विशेषणविशेष्यभावेविनिगमनाविरहेणकारणता
बाहुल्यापत्तेः॥कालिकसमवायोभयसंबंधस्यकार्यतावच्छेदकतावच्छेदकत्वात्सत्तायाः
नित्यसाधारण्येपिक्षतिविरहादित्यन्यत्रविस्तरः॥स्वतएवेति॥स्वतोव्यावृत्तत्वंचस्वभि
न्नलिंगजन्यस्वविशेष्यकस्वसजातीयभेदानुमित्यविषयत्वं॥॰साजात्यंचपदार्थविभा
जकोपाधिरूपेण॥तेनघटादेस्तादात्म्येनव्यावृत्तत्वेपिविशेषस्यगुणादिशून्यत्वेनतरभे
दानुमितिविषयत्वेपिद्रव्यादेरपिप्रमेयत्वादिनाविशेषजातीयत्वेपिचनक्षतिः॥नित्यद्रव्ये

वृत्तिरिति॥विशेषाणांस्वानकल्पनंनतुतल्लक्षणप्रविष्टप्रयोजनाभावात्॥तत्रविशेषव्यावृत्तो॥न
न्चेतत्परमाणुत्वादयोव्यावर्त्तकाभविष्यंतिकिंविशेषेणेतिचेन्न॥अव्यावृत्तधर्मस्यव्यावर्त्त
कत्वाभावात्॥तत्रव्यावर्त्तकांतरापेक्षायामनवस्थानात्॥ननुविशेषेऽतिप्रसंगइतिचेन्न॥त
स्यधर्मिग्राहकमानेनव्यावर्त्तकत्वसिद्धेः॥एवंचनित्यद्रव्येषुविशेषाःसिद्धास्तद्गुणास्तुनविशेष
वंतः॥आश्रयरूपेणविशेषणेवतेषांव्यावृत्तत्वात्॥आश्रयस्यचविशेषवत्तयाव्यावृत्तत्वे
नविशेषसंभवादितिभावः॥ईश्वराकाशयोर्नित्यज्ञानशब्दाभ्यांव्यावृत्तेःसंभवान्नतत्रविशेष
इत्याहुः॥नवीनास्तु॥विशेषेऽतिरिक्तेमानाभावः॥यद्येवंविशेषाणांव्यावृत्तत्वंतथानित्यद्रव्या
णामपीत्याहुः॥यदीनांकपालादीद्रव्येषुगुणकर्मणोः॥तेषुजातेश्चसंबंधइतिमूलं॥तत्रघ
टपदंकपालपदेऽवयव्यवयविपरइत्याह॥अवयवावयविनोरिति॥जातेश्चेतिचकारेणनि
त्यद्रव्येषुविशेषसंबंधःसमुच्चीयतइत्याह॥नित्यद्रव्यविशेषयोरिति॥समवायलक्षण

माह॥नित्यसंबंधत्वमिति॥संबंधश्चसंबंधिभिन्नोग्राह्यः॥तेननित्याभावादिस्वरूपसंबंधेनाति
व्याप्तिः॥ननुसमवायस्यसंबंधत्वेकिंप्रमाणमित्याशंक्यायामाह॥तत्रप्रमाणंलिति॥गुणक्रियादी
त्यादिनाजातिपरिग्रहः॥संयोगादीति॥द्रव्यद्रव्ययोरेवसंयोगइतिनियमादितिभावः॥अत्रस
मवायसंबंधेनपरत्वावच्छिन्नंप्रतितादात्म्यसंबंधेनतंतुत्वेनहेतुत्वात्कार्यतावच्छेदकसंबंधविध
यासमवायसिद्धिः॥नचसमवायस्यानित्यस्वरूपसंबंधनिवेश्यकार्यकारणभावःकल्पनी
यइतिवाच्यं॥तथासतियत्समवेतंकार्यमुत्पद्यतइत्यादिसमवायिकारणव्यवहारोन
स्यात्॥नचयत्संबद्धंकार्यमुत्पद्यतेतत्समवायिकारणमित्येवास्तितिवाच्यं॥कपालसंब
द्धघटध्वंसंप्रतिकपालस्यसमवायिकारणत्वप्रसंगात्इत्यादिरूह्यं॥सिद्धसाधनमिति॥अयुतसि ३२
द्धयोःस्वरूपसंबंधइतिवदतःपरस्येतिशेषः॥अर्थांतरेचेति॥समवायसाधनेप्रवृत्तानांनैय्यायिका
नामितिशेषः॥ननुतथापिसमवायस्यैकत्वेकिंमानमतआह॥लाघवादिति॥तथाचयथाश्रु

त्यादिजनकत्वेश्वरेलाघवादेकएवसिध्यतितथासमवायोपीत्यर्थः॥रूपवत्ताबुद्धिसमंगदृति॥
रूपवत्ताबुद्धेःप्रमात्वप्रसंगइत्यर्थः॥स्पर्शसमवायरूपसमवाययोरेकयादितिभावः॥तत्रावायो॥
रूपाभावादिति॥नवरूपसमवायसंबंधेनतत्रकथंरूपाभावःसंबंधसंबंधिनस्यतेनसंबंधेन
संबंधिसंबंध्यत्वादितिवाच्यं॥रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणतायाः
रूपसंबंधत्वान्नस्यवायावभावात्॥एथिव्यांगंधसमवायोनस्वेइत्यादिप्रतीतेःसमवायस्यना
नात्वमितिनुनय्याः॥संबंधांतरं॥अतिरिक्तपदार्थत्वेनिशेषःसिद्ध्यदित्यस्यभूतलादावित्या
दि॥यदिवैशिष्ट्यमतिरिक्तमुरीक्रीयेतनदात्तनित्यमनित्यंवेतिविकल्प्यदूषणाह॥
तस्येति॥ननुवैशिष्ट्यस्यतत्रसत्वेपिघटानमनदशायांतत्रघटाभावाभावादेवनघटाभा
वबुद्धिरतआह॥घटाभावस्येति॥तत्र॥घरवतिभूतले॥तस्येति॥घटाभावस्येत्यर्थः॥

न्यथा॥ घटाभावस्यानित्यत्वे॥ देशांतरेपि॥ घटशून्यदेशेत्यर्थः॥ घटत्वावच्छिन्नाभावस्यैकत्वादिति
भावः॥ वैशिष्ट्यस्येति॥ वैशिष्ट्यस्यनित्यत्वाभ्युपगमपक्षइत्यादिः॥ तत्र॥ घटानयनेनघटवति॥
नश्चघटवतिनघटाभावबुद्धिर्घटवच्चाज्ञानस्यप्रतिबंधकस्यसत्वादितिवाच्यं॥ घटावच्चाबु
द्धिविरहदशायांघटाभावबुद्धेर्जायमानायाःप्रमात्वप्रसंगादित्यत्रतात्पर्यात्॥ ननुसिद्धांति
नोपिमतेपाकेनरक्तेघटेश्यामरूपसमवायसत्वाश्यामरूपवत्ताधीप्रसंगइत्यतआह॥ म
मद्धितिद्वितीयेदूषणमाह॥ वैशिष्ट्यस्येति॥ ननुवैशिष्ट्यानंगीकारेघटाभावभूतलयोः॥
कःसंबंधस्वरूपमितिचेत्तथासतिघटशून्यशालादशायामिवघटवत्तादशायामपिभूतलेघ
टाभावबुद्धिस्तवमतेपिस्यात्॥ घटाभावभूतलयोस्तत्स्वरूपसंबंधस्यचतत्रसत्वादतआ

ह॥ एवंचेति॥ तत्तत्कालीनमिति॥ घटाभाववद्भूतलमितिज्ञानकालीनमित्यर्थः॥ तत्तद्भूतला
दिकमिति॥ यत्रमूलेतेघटाभावबुद्धिस्तद्भूतलादिकमित्यर्थः॥ तत्तद्भावानामिति॥ यस्ययं
स्याभावस्यबुद्धित्वमित्यर्थः॥ तथाचनस्वरूपमात्रंसंबंधः॥ किंत्वीदृशस्वरूपविशेषइतिन
पूर्वोक्तातिप्रसंगइतिभावः॥ नन्वस्तु॥ वैशिष्ट्यंपदार्थांतरमेव॥ भूतलंघटाभाववदितिप्रत्य
यात्॥ स्वरूपसंबंधाभ्युपगमेचाभावाधिकरणइत्यखंडेभेदतावन्मात्रविषयकज्ञानादिक
मादायविनिगमनाविरहइत्याहुः॥ द्रव्यादिषड्भावान्योन्याभावइति॥ इहचद्रव्यत्वादिनप्रति
योगितावच्छेदकमनुगमात्॥ किंतुद्रव्यत्वसंख्येवद्विप्रतियोगिताकभेदस्यद्वित्वमिवे
तिध्येयं॥ वस्तुतोभावभिन्नत्वमेवतथाबोध्यं॥ अत्रकेचित्॥ भावभिन्नत्वस्याभावत्वेभा

वत्वरूपावशेषणज्ञानशून्यकालेधरोनास्तीतिप्रतित्यनुपपत्तिः॥एवमन्योन्याभावत्वस्याभावत्व
गर्भस्यात्रैवरूढ्यतयाभावत्वस्यान्योन्याभावत्यगर्भत्वेन्योन्याश्रयापत्तिः॥एवमभावत्वस्यभा
वभिन्नत्वरूपत्वेऽभावोनभावइतिवाक्याच्छब्दबोधानुपपत्तिश्च॥उद्देश्यतावच्छेदकविधेययो
रैक्यादिति॥तस्मादखंडोपाधिरनुयोगितविशेषोऽभावत्वमितिवदंति॥तत्रन्यथाः॥अभा
वत्वस्याखंडोपाधित्वेमाणाभावः॥किंतुभावभिन्नत्वंसमवायसामानाधिकरण्याय
त्तसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावरूपंतत्तच्चपूर्वोपस्थितमपिप्रकारः॥एवंच
घटाभावपटाभावप्रतीतीनामभावांशेऽनुगतत्वमप्युपपद्यते॥नचविषयतानवस्था॥
सत्ताप्यंताभावव्यक्तेःस्वरूपतएवप्रकारत्वोपगमात्॥अतएवसत्तारूपप्रतियोगित्वानं
विनापिघटानास्तीतिबुद्धौप्रकारः॥अभावत्वप्रकारकप्रत्यक्षएवप्रतियोगिधियोहेतु

त्वात्॥अन्यथारूपितमद्रतिप्रतीत्यापत्तेः॥नचसत्ताभावरूपस्यानुपस्थितस्यप्रकारत्वेविशेषणधि
योहेतुत्वेव्यभिचारइतिप्राच्यं॥विशेषणभेदेनहेतुतायाभिन्नहेनतत्वतद्धेतुत्वानुपगमात्फला
नुरोधित्वाकल्प्यमानायाइत्यादुः॥संसर्गोन्योन्याभावभेदतद्रतिमूलादेकःसंसर्गोऽपरोऽन्यो
न्याभावास्यद्रतिप्रतीयते॥तच्चायुक्तंसंसर्गस्याभावत्वानंगीकारादित्यतआह॥संसर्गाभा
वेति॥क्रमेणद्वयोरभावयोर्लक्षणमाह॥संसर्गाभावत्वमिति॥अन्योन्याभावेति॥व्यभि
चारणान्योन्याभावभिन्नेति॥घटादावतिव्याप्तिवारणायाभावपदं॥एवमग्रेपि॥तद्रा
प्येति॥तादात्म्येनसंबंधेनतादात्म्यावच्छिन्नतंप्रतियोगितायांमिवस्थितं॥तेनसंयोगायवच्छिन्नप्र
तियोगिताकसंयोग्यत्यंताभावेनातिव्याप्तिः॥प्रागभावस्यलक्षणमाह॥विनाश्यभावत्वमिति॥
अत्रध्वंसेतिव्याप्तिवारणायविनाशीति॥ननुप्रागभावस्यलौकिकमानमितिचेत्रोत्पन्नस्य

पुनरुत्पद्यमियातिसिद्धिरितिप्राचः।केचित्तु।जातोघटइत्यादिवदुत्पन्नोघटध्वंसहितप्रत्यक्ष
बलेननाशोतिरिच्यतेनत्वप्रागभावः।इहहदानींघटप्रागभावइतिलोकानांप्रत्ययाभावात्॥
नचतद्वदोपधायकतत्कपालतत्संयोगादीनांतद्वदुत्पत्तिकालेपिसत्वात्पुनरपितद्वदुत्पा
त्तिः।प्रागभावांगीकारेचतदभावादेवनपुनस्तदुत्पत्तिरितिवाच्यं।जन्यद्रव्यवृत्त्यवच्छिन्न
प्रतियोगिताकद्रव्याभावस्यविरहेणोक्त
दोषस्यसंभवात्॥नचजन्यद्रव्याभावस्यतुल्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य
वाहेतुत्वमित्यत्रविनिगमनाविरहेणतादृशद्रव्याभावस्यतादृशध्वंसाभावानांचकार
णतापेक्षयालाघवादेकएवप्रागभावहेतुःकल्पतइतिवाच्यं॥प्रागभावकल्पनेपितत्का
लोत्पत्तिकानंतपदार्थप्रतियोगिताकानामनंतानांप्रागभावानांविनिगमनाविरहेणहे

तुतायादूर्वारत्नातथाचप्रागभावोरूपधर्मिकल्पनागौरवंपरमितिरिच्यतेइत्याहुः॥अत्र
वदंति॥स्वानाधिकरणेषुनंतुषुपटोत्पत्तिवारणायसहस्रतंतुकपटोत्पत्तिस्थलेबहूनांत
न्तूनांतत्संयोगानांचतन्नाशकत्वेनहेतुत्वकल्पनापेक्षयैकप्रागभावस्यहेतुत्वंलाघवीयसी॥
अथैवमपिद्वित्रितंतुकर्षेतंतुसहस्रतंतुकपटोत्पत्त्यापत्तिः॥नचचरमसंयोगव्यक्ति
घटितेनहेतुत्वान्नापत्तिरितिवाच्यं॥तथासतिस्वानधिकरणतंतुषुचरमसंयोगाभा
वादेवपटोत्पत्तिवारणसंभवेप्रागभावकल्पनानौचित्यादितिचेन्न॥चरमसंयोगस्य
समवायघटितसामानाधिकरण्यप्रत्यासत्याहेतुत्वेतंत्वंतरेपिसमवायेनपटोत्पत्त्या
तत्रसमवायेनचरमसंयोगाभावेनव्यभिचारात्पत्याकालिकसंबंधेनतत्सत्वायछि
न्नप्रतिचरमोपन्नसंयोगव्यक्तेश्चकालिकसंबंधेनहेतुवाच्यात्तथाचस्वानधिकरण

मु०टी० ३५

नतुषपिकालिकतयाचरमसंयोगसत्वासंभवेसतिवारणायप्रागभावहेतुत्वस्यावश्यकत्वादिति।एवमन्यत्रु
क्तंचनातिरिक्तपदार्थत्वेपितस्यप्रतियोगिकत्वेप्रमाणाभावइतितुतत्रध्वंसस्यलक्षणमाह॥ज
न्याभावत्वमिति॥प्रागभावेअतिव्याप्तिवारणायजन्येति॥अत्यन्याभावस्यलक्षमाह॥नित्येति॥ध्वंसा
दिवारणायनित्यपदं॥ननुअत्यंताभावस्यनित्यत्वेघटानयनानंतरमपिभूतलेघटोनास्तीतिप्रतीयापत्ति
रित्यतआह॥यत्रस्थिते॥तथाचसंबंधाभावादेवघटानयनानंतरंघटत्यंताभावबुद्धिनेतिभावः॥का
लविशेषविशिष्टस्वरूपस्यसंसर्गतोपगमादेवघटवतिघटेनास्तीतिप्रतित्यभावोपपत्तौचतुर्थ
संसर्गाभावेमानाभावइत्यस्वरसःकेचिदित्यनेनसूचितः॥ननुमास्तुघटकालेघटात्यंताभावबुद्धिः च ३५
लोत्पत्तेप्राक्कालेतुस्यादित्याशंक्याह॥उत्पत्तेरित्या०दिना॥ननुतर्हिरक्तरूपप्रागभावाधि
करणेश्यामकेघटेश्यामरूपध्वंसाधिकरणेचरक्तघटेकथंरक्तोनास्तिश्यामो

नास्तीतिप्रतीतिः॥ध्वंसप्रागभावयोरधिकरणेत्यंताभावस्यअसत्वादित्यतआह॥श्यामघटइति॥
तंत्रेति॥ध्वंसप्रागभावयोरित्यर्थः॥अत्यंताभावेनसहेतिशेषः॥तथाचनव्यमतपूर्वपक्षिक
थितशंकायामिष्टापत्तिरेवेतिभावः॥युक्तंचैतत्॥कथमन्यतापूर्वमपिरक्तेश्यामेघटे
रक्तंरूपंनास्तीत्याकारकप्रत्ययस्तस्यसामान्यावगाहित्वात्॥नचैतादृशप्रत्ययोरक्तेध्वंसाव
गाहि॥पूर्वापररक्तेध्वंसप्रागभाववतिरक्तेपितादृशाकारकप्रत्ययाप्रसंगादिति॥नच
रक्तत्वावच्छिन्नप्रतियोगिताकत्वध्वंसप्रागभावयोर्व्याप्यवृत्तित्वेनांतराश्यामेरक्तंनास्ती
तिप्रत्ययः॥तदाध्वंसप्रागभावयोःसामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात्॥नतुपू
र्वापररक्तेध्वंसप्रागभाववतिरक्तेतत्रतदनुभ्युपगमादितिवाच्यं॥विनिगमनाविरहेण
पश्चात्तरध्वंसप्रागभावयोरपितत्स्वीकारप्रसंगेनगौरवात्॥तदपेक्ष्यात्यंताभावस्यात

रत्यामदोसंबंधकल्पनेलाघवादित्यन्यत्रविस्तरेणन्वभावस्तुद्विधेत्यादिभागोक्तप्रन्थोभावेमा
नाभावादित्यभिप्रायेणप्राभाकराः॥शंकते॥नन्विति॥आभावस्याधिकरणात्मकत्वेगोरवंप्रस्त्री
यतिनुमनैतेयुक्तं॥अतिरिक्तेति॥भावातिरिक्तेत्यर्थः॥आभावस्याधिकरणात्मकत्वेभेदेआ
धाराधेयभावानुपपत्तिरूपोदोषःसोप्यस्मन्मतेनेत्याह॥एवंचेति॥अधिकरणापेक्षयातिरि
क्तत्वेचेत्यर्थः॥नन्वभावाधिकरणकाभावस्याधिकरणात्मकत्वेयथाधाराधेयभावोपपत्तिस्त
थासर्वत्रायस्तुइत्यतोदूषणांतरमाह॥एवंचेति॥अन्यथा॥आभावस्याधिकरणात्मकत्वे॥ए
तेनवक्ष्यमाणदूषणेनापरस्परधर्मितापन्नानांसत्यपदार्थानामेवपरस्परभेदकत्वंज्ञापयि ३०
तुमाह॥इदानीमिति॥पदार्थनिरूपणानंतरमित्यर्थः॥तत्रनीरूपनेततत्पदार्थस्यमाहर्म्यतायां
निरूपणासंभवादितिभावः॥समानोधर्मःसधर्मस्तस्यभावःसाधर्म्यंएवंवैधर्म्यमित्यत्रापीति

भ्रमवारणायबहुव्रीहिमाह॥समानोधर्मोयेषामिति॥केवलान्वयित्वादिति॥विषयतायाभे
देतिज्ञानविषयतात्वेनकेवलान्वयित्वमस्त्येवेतिभावः॥एवमग्रेति॥ज्ञेयत्वादित्यत्रादिपदार्थं
दर्शयति॥एवमभिधेयत्वेति॥अभिधेयत्वमभिधाविषयत्वं॥अभिधात्वंसंकेतः॥प्रमेय
त्वादिकमित्यादिनास्तित्वपरिग्रहः॥तच्चकालसंबंधित्वं॥द्रव्यादीनापण्णांसाधर्म्येभावत्वं
स्पष्टमत्रतदुपेक्ष्यद्रव्यादिपंचानांसाधर्म्यमूलेप्रपंचितंद्रव्यादयइत्यादीनां॥अनेकत्वस
त्तिभावत्वमिति॥एवंचमूलेद्रव्यादयःपंचेतिउद्देश्यपदंभावाअनेकइतिविधेयपदमिति
बोध्यं॥अतएवभाष्येपंचानामित्यक्तंनतुपंचभावानामिति॥अनेकभाववृत्तीत्यादि॥
अत्रचानेकभाववृत्तित्वं॥स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्याभ्यसंबंधेनभ
दविशिष्टत्वेसतिभाववृत्तित्वं॥तेनगुणादौसंख्यारूपस्यानेकत्वस्याभावेनाव्याप्तिः॥

भावत्वरूपतादृशधर्ममादायसमवायेतिव्याप्तिवारणायपदार्थविभाजकेपाधीति॥उपाधिमत्तासमवा
यस्वरूपसंबंधान्यतरसंबंधेनतेनकालिकसंबंधेनध्वंसस्यतादृशेपाधिमत्वेपिनक्षतिः॥समवा
येनोपाधिमत्वविवक्षणेतुसामान्यादावव्याप्तिःस्यादतस्तन्नोक्तं॥अन्यतरत्वघटकरूपंतुकालिकस
बंधभिन्नंग्राह्यं॥तेनध्वंसेनातिव्याप्तिः॥अत्रसमवेतसमवेतवृत्तिपदार्थविभाजकोपाधित्वं द्र
व्यादिचतुर्णांसाधर्म्यबोधं॥उद्देश्यवाचपदस्यचरममुपादाममयुक्तमतोयोजनयातदर्थंप्रश्न
र्शयति॥द्रव्यकर्मगुणकर्मणामिति॥निर्गुणक्रियइतिमूलंतदर्थश्चगुणक्रियासंताभावत्वं॥त
नगुणक्रियान्योन्याभावमादायद्रव्येनातिव्याप्तिः॥यद्यपिगुणेति॥नचगुणगुणिनोर्वामदक्षि
णविषाणमत्समानकालीनत्वात्कथंगुणशून्यत्वमितिवाच्यं॥निर्गुणोगुणोसतिस्वीकरणात
संभावात्॥नचैवंभूपिघटादेरप्यक्षणावच्छिन्नस्यचाक्षुषतानस्यादितिवाच्यं॥इष्टापत्तेः॥त

थापीति॥गुणवत्ताचसमवायेन॥तेनकालिकेनगुणवद्वृत्तेर्गुणत्वादेरसंग्रहेनपिनक्षतिः॥गुण
वद्वृत्तित्वंचसमवायस्वरूपान्यतरसंबंधेन॥तेनसमवायेनगुणवद्वृत्तिद्रव्यभिन्नेत्ता द्र
व्यत्वप्रकारकप्रमाविशेष्यत्वंस्वद्रव्येसत्वादतिव्याप्तिरथतेनेनतद्वृत्वंधात्वंतदासा
मान्यादावव्याप्तिरितिपरास्तं॥पदार्थविभाजकपदकृत्यमाह॥आकाशत्वादिकंत्वादि॥
कर्मवद्वृत्त्याकाशत्वरूपोपाधिमत्याकाशेऽतिव्याप्तिवारणायतपदमितिभावः॥जा
त्यादीनामप्येकार्थसमवायसंबंधेनसामान्यवत्वात्सामान्यपरिहारायेतिमूलमयुक्त
मतोव्याचष्टे॥सामान्यानधिकरत्वमिति॥तथाचसामान्यनिरूपिताधिकरणतानसामा
न्यादौएकार्थसमवायस्याधिकरणतानियमकत्वाभावादितिभावः॥अप्रसिद्ध्यापरि
मांडल्यपदार्थनिर्वक्ति॥परिमांडल्यमितिनद्वितीयं॥परिमांडल्यभिन्नानां॥ननुद्व्यप

कपरिमाणस्याधिकारणत्वाभावत्वव्याप्तिरतःपारिमाण्डल्यपदंद्व्यणुकपरिमाणस्याप्युपल
क्षकंतेनतस्याघलक्ष्यत्वमित्यभिप्रायेणोह॥अनुपरिमाणंत्रिति॥पुरमाणुद्व्यणुकसाधारण
मणुपरिमाणंत्रियर्थः॥पारिमांडल्यस्यकारणत्वेबाधकमाह॥तद्धिति॥परिमाणंहेयर्थः॥तंचेतिचस्त्व
र्थे॥तत्रहेतुमाह॥परिमाणस्येतिस्वसमानजातीयेति॥साजात्यमत्रपरिमाणविभजकोपाधिरूपेणबो
ध्यं॥अणुजन्येनि॥उ एंचाणोरणुतरमेवेतिभावः॥नचाणुजन्यस्याणुतरत्वमस्तुकिंबाधकमितिवाच्यं।
तथासतित्रुटेरचाक्षुषत्वप्रसंगात्॥ननुतर्हिद्व्यणुकादिपरिमाणस्यकिंजनकमितिचेत्संख्येत्यवे
हि॥व्यक्तंभविष्यतिचेदमुपरिष्टात्॥मूलस्यन्यूनतांपरिहरति॥एवमिति॥बोध्याइत्यनेनान्वयः॥
नकारणानीतिबोध्याइत्यर्थः॥एंद्रियकेयर्महत्वसामान्ययोस्वविषयकत्वे॥किकप्रत्यक्षहेतुत्वासर ३९
मत्वांतींद्रियत्वेविशेषेण॥ननुयोगिप्रत्यक्षेपारिमांडल्यस्यापिविषयविधयाकारणत्वात्पारिमांडल्य

भिन्नानामित्याद्ययुक्तमतआह॥दृढामपीति॥यथायोगजधर्मेणातीत-विषयकप्रत्यक्षंतथाविद्य
मानविषयकमपीतिभावः॥ननुज्ञायमानसामान्यस्यप्रत्यासत्तित्वेनज्ञायमानहेतोश्चानुमिति
करणत्वेनपारिमांडल्यस्यसामान्यलक्षणाजन्यज्ञानेअनुमितौचकारणत्वात्पारिमांडल्यभि
न्नानामितिमूलमसंगतमतआह॥ज्ञायमानमितिं॥आत्ममानसेति॥विषयतयाद्रव्यत्वेकि
कप्रत्यक्षेसमवेयेनमहत्वस्यहेतुत्वादितिभावः॥यद्यपिस्वप्रत्यक्षेद्रव्येवक्तुमुचितंतथापि
टीकाकृन्मतेआत्मैकत्वमहत्वयोरयोग्यत्वात्प्रत्यक्षंनसंभवतीत्यात्ममानसद्रव्यत्वं॥केचित्तु॥
करत्वंचान्यत्रपारिमांडल्यादिभ्यइत्थंमाध्येआदियहणात्परममहंत्वंगृह्यतेइतिवदंतोमार्तंड
णामात्मपरिमाणमपिकारणमित्याशयेनोलभ्यते॥नचतत्रपरममहत्पदमात्मपरिमाणातिरि
क्तपरममहत्परिमाणपरमितिवाच्यं॥मानाभावादितिचेन्नातन्मतंदूषयतुमुपन्यस्यति॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मु०टी० तस्यापीति ॥ आस्तामहत्त्वस्यापीत्यर्थः ॥ आचार्याणां ॥ उदयनाचार्याणां ॥ ज्ञानातिरिक्तं प्रत्येवेति ॥ कार
णत्वंचन्यायमतेतिरकार्यापेक्षयाऽस्याचार्यग्रंथः ॥ ज्ञातधर्मोज्ञानादयःतदतिरिक्तभावकार्यंप्रति
कारणत्वंपारिमांडल्यभिन्नानांसाधर्म्यमितितदर्थः ॥ एवंचपारिमाडल्मादीत्यत्रादिपदेनपरम
महत्वंगृह्यतामाचार्याणामयमाशयोयत्पारिमाडल्मस्यपरममहत्वादीनांचज्ञानातिरि
क्तंप्रतिनकारणत्वं ॥ नतुकारणत्वसामान्याभावस्तदनुमन्तइतिभावः ॥ आचार्यैस्तुपारिमाड
ल्मादीत्यादिपदार्थेषुसुखदुःखादिजनितावयवरूपादेःपाकजनष्टपरमाणुरूपादेश्चागणना
नेषांलक्ष्यत्वमनुमतं ॥ एवंचतेषुज्ञानायतिरिक्तभावकार्यफलोपधायकत्वरूपस्याचार्यल
क्षणस्योद्यासिंपरिचिंत्यसपक्षस्याकोयंग्रंथकृतेतिध्वोयं ॥ मूलेत्यथासिद्धीति ॥ दंडत्वादो
नियतायाःपूर्ववृत्तितायाःसत्वादनैकान्तिकत्वमनुक्तमन्यत्तासिद्धिशून्यमेति ॥ नदृष्टत्वावच्छिन्न